# શ્રી ઉત્તરાધ્યયન-સૂત્ર

(મૂળ-શ્લોક - સં.છાયા)

(ભાગ-૧)

(અધ્યયન ૧ થી ૧૩)



સંપાદક

પૂ.મુનિરાજ શ્રી તત્વપ્રભ વિ.મ.સા.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

નમામિ નિત્યં ગુરુ રામચન્દ્રમ્

નમોનમઃ ગુરુ જિનપ્રભસૂરયે

# શ્રી ઉત્તરાધ્યયન સૂત્ર

## (મૂળ શ્લોક - સંસ્કૃત છાયા)

## (ભાગ-૧)

## (અધ્યયન ૧ થી ૧૩)


❖ સંપાદક ❖

પૂ. આ. ભ. શ્રી જિનપ્રભસૂરિ મ. સા. ના શિષ્યરત્ન

**પ. પૂ. મુનિરાજ શ્રી તત્ત્વપ્રભવિજયજી મ. સા.**


૨૭


❖ પ્રકાશક ❖

**પૂ. આ. શ્રી જિનપ્રભસૂરિ ગ્રંથમાલા**

**C/o રસીકભાઈ એમ. શાહ**

એ-૮, ધવલગીરી ફ્લેટ, ૮મે માળે,

જૈન દેરાસર પાસે, ખાનપુર, બહાઈ સેન્ટર,

અમદાવાદ - ૧, મો : ૯૯૦૪૫૦૧૨૨૧



Jain Education International For Personal & Private Use Only www.jainelibrary.org

પૂ. આ. શ્રી જિનપ્રભસૂરિ ગ્રંથમાલા - ૨૭


**ગ્રંથ** : શ્રી આચારાંગ સૂત્ર
(મૂળ શ્લોક - સંસ્કૃત છાયા)

**કર્તા** : પૂર્વાચાર્ય

**સંપાદક** : પૂ.આ.ભ.શ્રી જિનપ્રભસૂરિ મ.સા.ના
શિષ્યરત્ન પૂ.મુનિરાજ
શ્રી તત્ત્વપ્રભવિ.મ.સા.

**પ્રકાશક** : પૂ. આં. શ્રી જિનપ્રભસૂરિ ગ્રંથમાળા

**નકલ** : ૧000

**મૂલ્ય** : સદુપયોગ

**પ્રકાશન વર્ષ** : વિ. સં. ૨૦૬૮, કા.વ.૬


## ❖ સૂચના ❖

આ ગ્રંથ શ્રી ભાવવર્ધક સુપાર્શ્વનાથ શ્વે. મૂ. જૈન સંઘની (રંગસાગર-પાલડી) જ્ઞાનખાતાની રકમમાંથી છપાયેલ હોવાથી ગૃહસ્થોએ માલિકી કરવી નહિ. પૂ. સાધુ-સાધ્વીજી ભ. + જ્ઞાનભંડારોને ભેટ મોકલવામાં આવે છે.


Jain Education International For Personal & Private Use Only www.jainelibrary.org

# નિમિત્ત

જિનશાસનભાસનભાસ્કર-સૂરિચક્ર-

ચક્રવર્તી-જિનશાસનના અણનમ સેનાની

બાલદીક્ષાયુગપ્રવર્તક-દેવદ્રવ્યરક્ષક

મોક્ષમાર્ગસાર્થવાહ-સિદ્ધાંતરક્ષક

સુવિશાલગચ્છાધિપતિ

સૂરિ "પ્રેમના" પનોતા પટ્ટધર

વીરપ્રભુની ૭૭મીપાટને દીપાવનાર

આચાર્ય દેવેશશ્રીમદ્

## વિજય રામચન્દ્રસૂરીશ્વરજી મહારાજા

સંયમ શતાબ્દી વર્ષ

વિ. સં. ૧૯૬૯, પો. સુ. ૧૩

વિ. સં. ૨૦૬૮, પો. સુ. ૧૩

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# સ્મૃત્યર્થે

મમજીવન નૌકા કર્ણધાર-પરમારાધ્યપાદ

**ગુરુમાતા**

શાંત-પ્રશાંત-ઉપશાંતમૂર્તિ

સુવિશુદ્ધસંયમી-મધુરભાષી

મરુધર દેશોદ્ધારક-

૪૫-૪૫-ઉપધાનતપના નિશ્રાદાતા

પ. પૂ. આચાર્યદેવેશશ્રીમદ્

વિજય જિનપ્રભસૂરીશ્વરજી મહારાજાના

અસીમ ઉપકારોની

સ્મૃતિમાં

તેઓશ્રીના કરકમલોમાં સમર્પણ

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# શ્રી ઉત્તરાધ્યયન સૂત્રનો મહિમા

જે ખરેખર આસન્ન સિદ્ધિવાલા, રત્નત્રયીના આરાધક અને ગ્રંથિ-ભેદવાળા ભવ્યાત્માઓ છે, તે આ અધ્યયનોને ભણે છે.

O O O

સર્વ જીવનો કલ્યાણની જ એક ભાવનાથી પરમાત્મા મહાવીરે ફરમાવેલ અંતિમ દેશના ના શબ્દ દેહ રૂપ ગ્રન્થ એટલે જ ઉત્તરાધ્યયન સૂત્ર આ સૂત્ર અનેક ભવ્યાત્માઓને મોહ રાહ ચીંધનારૂં બને છે.

O O O

જે અભવ્ય અને ગ્રંથિનો ભેદ નહિ કરનારા છે, તે અનંત સંસારી છે, તે સંક્લિષ્ટ કર્મવાળાઓ શ્રી ઉત્તરાધ્યયન સૂત્રના પઠનમાં અભવ્ય-અયોગ્ય છે.

O O O

જેમ ભુંડ ને ચોખા આદિના ઉત્તમ ભોજંન ને આરોગવાની ઇચ્છા થતી નથી તેમ અભવ્ય જીવને ઉત્તરાધ્યયન સૂત્ર જેવા ઉત્તમ ગ્રન્થને પઠનની રૂચી થતી નથી.

O O O

વિઘ્નરહિત જે આત્માએ આરંભેલ આ ઉત્તરાધ્યયનો મહામુશ્કેલીએ સમાપ્ત થાય છે, તે ભવ્ય આત્મા આ ઉત્તરાધ્યયનોને મેળવે છે. આ પ્રમાણે પૂર્વ ઋષિઓ કહે છે.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## શ્રુતજ્ઞાન મહિમા

लेखयन्ति नरा धन्या,
ये जैनागम पुस्तकान् ।
ते सर्वं वाङ्मयं ज्ञात्वा,
सिद्धिं यान्ति न संशयः ।।

જે પુણ્યશાલી પુરૂષો શ્રી જિનાગમના પુસ્તકોને લખાવે છે, છપાવે છે. તેઓ સકલશાસ્ત્રો જાણીને મોક્ષમાં જાય છે. તેમાં જરાયે શંકા નથી.

श्रुताराधनाच्च केवलज्ञानमपि सुलभम् ।

શ્રુતજ્ઞાનની આરાધનાથી કેવલજ્ઞાન પણ સુલભ બને છે.

अपूर्व ज्ञानग्रहणं,
महतीकर्मनिर्जरा ।
सम्यग्दर्शनं नैर्मल्यात्,
कृत्वा तत्त्वप्रबोधतः ।।

અપૂર્વ જ્ઞાન ગ્રહણ કરવાથી મોટી કર્મની નિર્જરા થાય છે અને સમ્યગ્દર્શનની નિર્મળતા થવાથી તત્ત્વનો બોધ થાય છે.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# અનુક્રમણિકા



| નં. | અધ્યયનનું નામ | પેજ નં. |
|---|---|---|
| ૧ | શ્રી વિનયશ્રુત અધ્યયન | ૧ |
| ૨ | શ્રી પરિષહ અધ્યયન | ૧૪ |
| ૩ | શ્રી ચતુરંગીય અધ્યયન | ૨૮ |
| ૪ | શ્રી પ્રમાદાપ્રમાદાધ્યયન | ૩૪ |
| ૫ | શ્રી અકામમરણીય અધ્યયન | ૪૦ |
| ૬ | શ્રી ક્ષુલ્લક નિર્ગ્રન્થી અધ્યયન | ૪૯ |
| ૭ | શ્રી ઉરભ્રીયાધ્યયન | ૫૪ |
| ૮ | શ્રી કાપિલીયાધ્યયન | ૬૨ |
| ૯ | શ્રી નમિપ્રવ્રજ્યાધ્યયન | ૬૭ |
| ૧૦ | શ્રી દ્રુમપત્રકાધ્યયન | ૮૩ |
| ૧૧ | શ્રી બહુશ્રુતપૂજાધ્યયન | ૯૩ |
| ૧૨ | શ્રી હરિકેશીયાધ્યયન | ૧૦૨ |
| ૧૩ | શ્રી ચિત્રસંભૂતાધ્યયન | ૧૨૦ |



Jain Education International For Personal & Private Use Only www.jainelibrary.org

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# श्री विनयश्रुत अध्ययन-१

**संजोगा विप्पमुक्कस्स, अणगारस्स भिक्खुणो ।**
**विणयं पाउकरिस्सामि, आणुपुव्विं सुणेह मे ।।१।।**

संयोगाद् विप्रमुक्तस्य, अनगारस्य भिक्षोः ।
विनयं प्रादुष्करिष्यामि, आनुपूर्वी शृणुत मे ।।१।।

**आणाणिद्देसकरे, गुरूणमुववायकारए ।**
**इंगियागारसंपण्णें, से विणीए त्ति वुच्चइ ।।२।।**

आज्ञा निर्देशकरः, गुरूणामुपपातकारकः ।
इङ्गिताकारसम्पन्नः, स विनीत इत्युच्यते ।।२।।

**आणाऽणिद्देसकरे, गुरूणमणुववायकारए ।**
**पडिणीए असंबुद्धे, अविणीए त्ति वुच्चइ ।।३।।**

आज्ञाऽनिर्देशकरो, गुरूणामनुपपातकारकः ।
प्रत्यनीकोऽसंबुद्धः, अविनीत इत्युच्यते ।।३।।

**जहा सुणी पूइकण्णी, निक्कसिज्जइ सव्वसो ।**
**एवं दुस्सील पडिणीए मुहरी निक्कसिज्जइ ।।४।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

यथा शुनी पूतिकर्णी, निष्कास्यते सर्वतः ।
एवं दुःशीलः प्रत्यनीकः मुखरी निष्कास्यते ।।४।।

**कणकुंडगं चइत्ताणं, विट्ठं भुंजइ सूयरो ।**
**एवं सीलं चइत्ताणं, दुस्सीले रमइ मिए ।।५।।**

कणकुण्डकं त्यक्त्वा खलु, विष्टां भुङ्क्ते सूकरः ।
एवं शीलं त्यक्त्वा खलु, दुःशीले रमते मृगः ।।५।।

**सुणियाऽभावं साणस्स, सूयरस्स नरस्स य ।**
**विणए ठविज्ज अप्पाणं, इच्छंतो हियमप्पणो ।।६।।**

श्रुत्वाऽभावं शून्याः सूकरस्य नरस्य च ।
विनये स्थापयेद् आत्मानं, इच्छन् हितमात्मनः ।।६।।

**तम्हा विणयमेसिज्जा, सीलं पडिलभेज्जओ ।**
**बुद्धपुत्ते नियागट्ठी न, निक्कसिज्जइ कण्हुइ ।।७।।**

तस्माद् विनयमेषयेत्, शीलं प्रतिलभेत यतः ।
बुद्धपुत्रो नियागार्थी न, निष्कास्यते कुतश्चित् ।।७।।

**निसंते सियाऽमुहरी, बुद्धाणं अंतिए सया ।**
**अट्ठजुत्ताणि सिक्खिज्जा, निरट्ठाणि उ वज्जए ।।८।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

निशान्तः स्यात् अमुखरः बुद्धानाम् अन्तिके सदा ।
अर्थ-युक्तानि शिक्षेत निरर्थानि तु वर्जयेत् ।।८।।

**अणुसासिओ न कुप्पिज्जा खंतिं सेविज्ज पंडिए ।**
**खुड्डेहिं सह संसग्गिं, हासं कीडं च वज्जए ।।९।।**

अनुशिष्टो न कुप्येत्, क्षान्तिं सेवेत पण्डितः ।
क्षुद्रैः सह संसर्ग, हासं क्रीडां च वर्जयेत् ।।९।।

**मा य चण्डालियं कासी, बहुयं मा य आलवे ।**
**कालेण य अहिज्जित्ता, तओ झाइज्ज एगओ ।।१०।।**

मा च चण्डालीकं कार्षीद्, बहुकं मा च आलपेत् ।
कालेन चाधीत्य, ततो ध्यायेत् एककः ।।१०।।

**आहच्च चण्डालियं कट्टु, न निण्हविज्ज कयाइवि ।**
**कडं कडेत्ति भासेज्जा, अकडं नो कडेत्तिय ।।११।।**

कदाचित् चाण्डालिकं कृत्वा, न निह्नुवीत कदाचिदपि ।
कृतं कृतमिति भाषेत, अकृतं नो कृतमिति च ।।११।।

**मा गलियस्सेव कसं, वयणमिच्छे पुणो पुणो ।**
**कसं व दट्ठुमाइन्ने, पावगं परिवज्जए ।।१२।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

मा गल्यश्व इव कशां, वचनम् इच्छेत् पुनः पुनः ।
कशाम् इव दृष्ट्वा आकीर्णः, पापकं परिवर्जयेत् ।।१२।।

**अणासवा थूलवया कुसीला,**
**मिउंपि चण्डं पकरंति सीसा ।**
**चित्ताणुया लहु दक्खोववेया,**
**पसार्यए ते हु दुरासयंपि ।।१३।।**

अनाश्रवाः स्थूलवचसः कुशीलाः
मृदुमपि चण्डं प्रकुर्वन्ति शिष्याः ।
चित्तानुगा लघु दाक्ष्योपपेताः,
प्रसादयेयुः ते हु दुराशयमपि ।।१३।।

**ना पुट्ठो वागरे किंचि, पुट्ठो वा नालियं वए ।**
**कोहं असच्चं कुव्विज्जा, धारिज्जा पियमप्पियं ।।१४।।**

नापृष्टो व्यागृणीयात् किंचित्, पृष्टो वा नालीकं वदेत् ।
क्रोधम् असत्यं कुर्वीत, धारयेत् प्रियमप्रियम् ।।१४।।

**अप्पा चेव दमेयव्वो, अप्पा हु खलु दुद्दमो ।**
**अप्पा दन्तो सुही होइ, अस्सिं लोए परत्थ य ।।१५।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

आत्मा एव दमितव्यः आत्मा हु खलु दुर्दमः ।
आत्मा दान्तः सुखी भवति, अस्मिन् लोके परत्र च ।।१५।।

**वरं मे अप्पा दंतो, संजमेण तवेण य ।**
**माऽहं परेहिं दम्मंतो, बंधणेहिं वहेहि य ।।१६।।**

वरं मे आत्मा दान्तः संयमेन तपसा च ।
माऽहं परैर्दमितः बन्धनैः वधैश्च ।।१६।।

**पडिणीयं च बुद्धाणं, वाया अदुव कम्मुणा ।**
**आवि वा जइ वा रहस्से, नेव कुज्जा कयाइ वि ।।१७।।**

प्रत्यनीकं च बुद्धानां, वाचा अथवा कर्मणा ।
आविर्वा यदि वा रहसि, नैव कुर्यात् कदाचिदपि ।।१७।।

**न पक्खओ न पुरओ, नेव किच्चाण पिट्ठओ ।**
**न जुंजे ऊरुणा ऊरुं, सयणे नो पडिस्सुणे ।।१८।।**

न पक्षतो न पुरतो, नैव कृत्यानां पृष्ठतः ।
न युक्ताद् ऊरुणा ऊरुं, शयने नो प्रतिशृणुयात् ।।१८।।

**नेव पल्हत्थियं कुज्जा, पक्खपिंडं च संजए ।**
**पाए पसारिए वावि, न चिट्ठे गुरूणंतिए ।।१९।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

नैव पर्यस्तिकां कुर्यात्, पक्षपिण्डं च संयतः ।
पादौ प्रसार्य वापि, न तिष्ठेद् गुरूणामन्तिके ।।१९।।

**आयरिएहिं वाहित्तो, तुसिणीओ न कयाइ वि ।**
**पसायपेही नियागट्ठी, उवचिट्ठे गुरुं सया ।।२०।।**

आचार्यै र्व्याहृतः तृष्णीको न कदाचिदपि ।
प्रसादप्रेक्षी नियागार्थी, उपतिष्ठेत् गुरुं सदा ।।२०।।

**आलवंते लवंते वा, न निसिज्ज कयाइ वि ।**
**चइऊण आसणं धीरो, जओ जत्तं पडिस्सुणे ।।२१।।**

आलपति लपति वा, न निषीदेत् कदाचिदपि ।
त्यक्त्वा आसनं धीरो, यतो यत्तत् प्रतिशृणुयात् ।।२१।।

**आसणगओ न पुच्छिज्जा, नेव सेज्जागओ कयाइवि ।**
**आगम्मुक्कुडुओ संतो, पुच्छिज्जा, पंजलीउडो ।।२२।।**

आसनगतो न पृच्छेत्, नैव शय्यागतः कदाचिदपि ।
आगम्योत्कुटुकः सन्, पृच्छेत् प्राञ्जलिपुटः ।।२२।।

**एवं विणयजुत्तस्स, सुत्तं अत्थं च तदुभयं ।**
**पुच्छमाणस्स सीसस्स, वागरिज्ज जहासुयं ।।२३।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

एवं विनययुक्तस्य, सूत्रम् अर्थं च तदुभयम् ।
पृच्छतः शिष्यस्य, गृणीयात् यथाश्रुतम् ।।२३।।

**मुसं परिहरे भिक्खू, न य ओहारिणिं वए ।**
**भासादोसं परिहरे, मायं च वज्जए सया ।।२४।।**

मृषां परिहरेद् भिक्षुः, न चावधारणीं वदेत् ।
भाषादोषं परिहरेत्, मायां च वर्जयेत् सदा ।।२४।।

**न लवेज्ज पुट्ठो सावज्जं, न निरट्ठं न मम्मयं ।**
**अप्पणट्ठा परट्ठा वा, उभयस्संतरेण वा ।।२५।।**

न लपेत् पृष्टः सावद्यं, न निरर्थं न मर्मगम् ।
आत्मार्थं परार्थं वा, उभयस्य अन्तरेण वा ।।२५।।

**समरेसु अगारेसु, संधीसु य महापहे ।**
**एगो एगित्थिए सद्धिं, नेव चिट्ठे न संलवे ।।२६।।**

समरेषु अगारेषु, संधिषु च महापथे ।
एकः एकस्त्रिया सार्थं, नैव तिष्ठेत् न संलपेत् ।।२६।।

**जं मे बुद्धाऽणुसासंति, सीएण फरुसेण वा ।**
**मम लाभो त्ति पेहाए, पयओ तं पडिस्सुणे ।।२७।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

यन्मां बुद्धा अनुशासति, शीतेन परुषेण वा ।
मम लाभ इति प्रेक्षया, प्रयतस्तत् प्रतिशृणुयात् ।।२७।।

**अणुसासणमोवायं, दुक्कडस्स य चोयणं ।**
**हियं तं मन्नए, पण्णो वेस्सं होइ असाहुणो ।।२८।।**

अनुशासनमौपायं, दुष्कृतस्य च चोदनम् ।
हितं तत् मन्यते प्राज्ञः, द्वेष्यं भवति असाधोः ।।२८।।

**हियं विगयभया बुद्धा, फरुसं पि अणुसासणं ।**
**वेस्सं तं होइ मूढाणं, खंतिसोहिकरं पयं ।।२९।।**

हितं विगतभया बुद्धाः, परुषमपि अनुशासनम् ।
द्वेष्यं तत् भवति मूढानां, क्षान्तिशोधिकरं पदम् ।।२९।।

**आसणे उवचिट्ठिज्जा अणुच्चे अकुए थिरे ।**
**अप्पुट्ठाई निरुट्ठाई निसीएज्जप्पकुक्कुए ।।३०।।**

आसने उपतिष्ठेत् अनुच्चे अकुचे स्थिरे ।
अल्पोत्थायि निरूत्थायी, निषीदेत् अल्पकौकुच्यः ।।३०।।

**कालेण निक्खमे भिक्खू, कालेण य पडिक्कमे ।**
**अकालं च विवज्जित्ता, काले कालं समायरे ।।३१।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

कालेन निष्क्रामेद् भिक्षुः, कालेन च प्रतिक्रामेत् ।
अकालं च विवर्ज्य, काले कालं समाचरेत् ।।३१।।

**परिवाडीए न चिट्ठेज्जा, भिक्खू दत्तेसणं चरे ।**
**पडिरूवेण एसित्ता, मियं कालेण भक्खए ।।३२।।**

परिपाट्यां न तिष्ठेत्, भिक्षुः दत्तेषणां चरेत् ।
प्रतिरूपेण एषित्वा, मितं कालेन भक्षयेत् ।।३२।।

**नाइदूरमणासन्ने नन्नेसिं चक्खुफासओ ।**
**एगो चिट्ठेज्ज भत्तट्ठं, लंघित्ता तं नाइक्कमे ।।३३।।**

नातिदूरमनासन्ने, नान्येषां चक्षुः स्पर्शतः ।
एकस्तिष्ठेद् भक्तार्थं, उल्लंघ्य तं नातिक्रमेत् ।।३३।।

**नाइउच्चे न नीए वा, नासण्णे नाइदूरओ ।**
**फासुयं परकडं पिंडं, पडिगाहिज्ज संजए ।।३४।।**

नात्युच्चे न नीचे वा, नासन्ने नातिदूरतः ।
प्रासुकं परकृतं पिण्डं, प्रतिगृहणीयात् संयतः ।।३४।।

**अप्पपाणेऽप्पबीयम्मि, पडिच्छन्नम्मि संवुडे ।**
**समयं संजए भुंजे, जयं अपरिसाडियं ।।३५।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

अल्पप्राणेऽल्पबीजे, प्रतिच्छन्ने संवृत्ते ।
समकं संयतो भुञ्जीत, यतमानोऽपरिशाटितम् ।।३५।।

**सुकडेत्ति सुपक्केत्ति, सुच्छिन्ने सुहडे मडे ।**
**सुनिट्ठिए सुलट्ठेत्ति, सावज्जं वज्जए मुणी ।।३६।।**

सुकृतमिति सुपक्वमिति, सुच्छिन्नं सुहृतं मृतम् ।
सुनिष्ठितं सुलष्टमिति, सावद्यं वर्जयेन्मुनिः ।।३६।।

**रमए पंडिए सासं, हयं भद्दं व वाहए ।**
**बालं सम्मइ सासंतो, गलियस्सं व वाहए ।।३७।।**

रमते पण्डितान् शासत्, हय भद्रमिव वाहकः ।
बालं श्राम्यति शासत्, गल्यश्वमिव वाहकः ।।३७।।

**खड्डुया मे चवेडा मे, अक्कोसा य वहा य मे ।**
**कल्लाणमणुसासंतो, पावदिट्ठित्ति मन्नई ।।३८।।**

खड्डुका मे चपेटा मे, आक्रोशाश्च वधाश्च मे ।
कल्याणमनुशासनं पापदृष्टिरिति मन्यते ।।३८।।

**पुत्तो मे भायणाइत्ति, साहू कल्लाण मन्नइ ।**
**पावदिट्ठि उ अप्पाणं, सासं दासेति मन्नइ ।।३९।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

पुत्रो मे भ्राता ज्ञाति रितिः, साधु कल्याणं मन्यते ।
पापदृष्टिस्तु आत्मानं, शास्यमानं दास इति मन्यते ।।३९।।

**न कोपए आयरियं, अप्पाणं पि न कोवए ।**
**बुद्धोवघाई न सिया, न सिया तोत्तगवेसए ।।४०।।**

न कोपयेत् आचार्यम्, आत्मानमपि न कोपयेत् ।
बुद्धोपधाती न स्यात्, न स्यात् तोत्रगवेषकः ।।४०।।

**आयरियं कुवियं नच्चा, पत्तिएण पसायए ।**
**विज्झविज्ज पंजलीउडो, वज्जए न पुणुत्तिय ।।४१।।**

आचार्य कुपितं ज्ञात्वा, प्रीतिकेन प्रसादयेत् ।
विध्यापयेत् प्राञ्जलिपुटः, वदेत् न पुनरिति च ।।४१।।

**धम्मज्जियं च ववहारं, बुद्धेहायरियं सया ।**
**तमायरंतो ववहारं, गरहं नाभिगच्छइ ।।४२।।**

धर्मार्जितश्च व्यवहारः, बुद्धैः आचरितः सदा ।
तमाचरन् व्यवहारं, गर्हा नाभिगच्छति ।।४२।।

**मनोगयं वक्कगयं, जाणित्तायरियस्स उ ।**
**तं परिगिज्झ वायाए, कम्मुणा उववायए ।।४३।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

मनोगतं वाक्यगतं, ज्ञात्वा आचार्यस्य तु ।
तत् परिगृह्य वाचा, कर्मणा उपपादयेत् ।।४३।।

**वित्ते अचोइए निच्चं, खिप्पं हवइ सुचोइए ।**
**जहोवइट्ठं सुकयं, किच्चाई कुव्वइ सया ।।४४।।**

वितः अनोदितः नित्यं, क्षिपं भवति सुनोदितः ।
यथोपदिष्टं सुकृतं, कृत्यानि करोति सदा ।।४४।।

**नच्चा नमइ मेहावी, लोए कित्ती से जायए ।**
**हवइ किच्चाणं सरणं, भूयाणं जगई जहा ।।४५।।**

ज्ञात्वा नमति मेधावी, लोके कीर्तिस्तस्य जायते ।
भवति कृत्यानां शरणं, भूतानां जगती यथा ।।४५।।

**पुज्जा जस्स पसीयंति, संबुद्धा पुव्वसंथुया ।**
**पसन्ना लाभइस्संति, विउलं अट्ठियं सुयम् ।।४६।।**

पूज्या यस्य प्रसीदन्ति, संबुद्धा पूर्वसंस्तुताः ।
प्रसन्ना लम्भयिष्यन्ति, विपुलं आर्थिकं श्रुतम् ।।४६।।

**स पुज्जसत्थे सुविणीयसंसए, मणोरुई चिट्ठइ कम्मसंपया ।**
**तवोसमायारि समाहिसंवुडे, महज्जुई पंचवयाइं पालिया ।।४७।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

स पूज्यशास्त्रः सुविनीतसंशयः,

मनोरुचिस्तिष्ठत्ति कर्मसंपदा ।

तपः समाचारी समाधिसंवृतः,

महाद्युतिः पञ्च व्रतानि पालयित्वा ।।४७।।

**स देवगंधव्वमणुस्सपूइए,**

**चइत्तु देहं मलपंकपूइयं ।**

**सिद्धे वा हवइ सासए,**

**देवे वा अप्परए महिड्ढिए त्ति बेमि ।।४८।।**

स देवगन्धर्वमनुष्यपूजितः,

त्यक्त्वा देहं मलपङ्कपूतिकम् ।

सिद्धो वा भवति शाश्वतः,

देवो वा अल्परजा महर्द्धिक इति ब्रवीमि ।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

# श्री परीषहाध्ययन-२

**सुअं मे आउसं तेणं भगवया एवमक्खायं, इह खलु बावीसं परीसहा, समणेणं भगवया महावीरेणं कासवेणं पवेइआ, जे भिक्खू सोच्चा णच्चा जिच्चा अभिभूय भिक्खायरिआए परिव्वयंतो पुट्ठो णो विहणेज्जा ।।१।।**

श्रुतं मे आयुष्मन् ! तेन भगवता एवमाख्यातं, इह खलु द्वाविंशतिः परिषहाः श्रमणेन भगवता महावीरेण काश्यपेन प्रवेदिताः, यान् भिक्षुः श्रुत्वा ज्ञात्वा जित्वा अभिभूय भिक्षाचर्यायां परिव्रजन् स्पृष्टः नो विहन्येत ।।१।।

**कयरे ते खलु बावीसं परीसहा समणेणं भगवया महावीरेणं कासवेणं पवेइआ जे भिक्खू सोच्चा णच्चा जिच्चा अभिभूय भिक्खायरिआए परिव्वयंतो पुट्ठो णो विहणेज्जा ।।२।।**

कतरे ते खलु द्वाविंशतिः परिषहाः श्रमणेन भगवता महावीरेण काश्यपेन प्रवेदिताः यान् भिक्षुः श्रुत्वा ज्ञात्वा जित्वा अभिभूय भिक्षाचर्यायां परिव्रजन् स्पृष्टः नो विहन्येत ।।२।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**इमे ते खलु बावीसं परीसहा समणेणं भगवया महावीरेणं कासवेणं पवेइआ, जे भिक्खू सोच्चा णच्चा जिच्चा अभिभूय भिक्खायरिआए परिव्वयंतो पुट्ठो णो विणिहन्नेज्जा ।।३।।**

इमे ते खलु द्वाविंशतिः परीषहाः श्रमणेन भगवता महावीरेण काश्यपेन प्रवेदिताः, यान् भिक्षुः श्रुत्वा ज्ञात्वा जित्वा अभिभूय भिक्षाचर्यायां परिव्रजन् स्पृष्टो नो विनिहन्येत ।।३।।

**तं जहा दिगिंच्छापरीसहे १, पिवासापरीसहे २, सीअपरीसहे ३, उसिणपरीसहे ४, दंसमसय परीसहे ५, अचेलपरीसहे ६, अरइपरीसहे ७, इत्थीपरीसहे ८, चरिआपरीसहे ९, निसीहिआपरीसहे १०, सिज्जापरीसहे ११, अक्कोसपरीसहे १२, वहपरीसहे १३, जायणापरीसहे १४, अलाभपरीसहे १५, रोगपरीसहे १६, तणफासपरीसहे १७, जल्लपरीसहे १८, सक्कारपुरक्कारपरीसहे १९, पन्नापरीसहे २०, अन्नाणपरीसहे २१, दंसणपरीसंहे २२ ।।४।।**

तद् यथा-क्षुधापरीषहः १, पिपासापरीषहः २, शीतपरीषहः ३, उष्णपरीषहः ४, दंशमशकपरीषहः ५, अचैलपरीषहः ६, अरतिपरीषहः ७ स्त्रीपरीषहः ८, चर्यापरीषहः ९, नैषेधिकीपरीषहः



Jain Education International For Personal & Private Use Only www.jainelibrary.org

१०, शय्यापरीषहः ११, आक्रोशपरीषहः १२, वधपरीषहः १३, याचनापरीषहः १४, अलाभपरीषहः १५, रोगपरीषहः १६, तृणस्पर्शपरीषहः १७, जल्लपरीषहः १८, सत्कारपुरस्कारपरीषहः १९, प्रज्ञापरीषहः २०, अज्ञानपरीषहः २१, दर्शनपरीषहः २२ ।।४।।

**परीसहाणं पविभत्ती, कासवेणं पवेइआ ।**
**तं भे उदाहरिस्सामि, आणुपुव्विं सुणेह मे ।।१।।**

परीषहाणां प्रविभक्तिः, काश्यपेन प्रवेदिता ।
तां भवतां उदाहरिष्यामि, आनुपूर्व्या शृणुत मे ।।१।।

**दिगिंछा परिगए देहे, तवस्सी भिक्खू थामवं ।**
**न छिंदे न छिंदावए, न पए न पयावए ।।२।।**

क्षुधापरिगते देहे, तपस्वी भिक्षुः स्थामवान् ।
न छिन्द्यात् न छेदयेत्, न पचेत् न पाचयेत् ।।२।।

**कालीपव्वंगसंकासे, किसे धमणिसंतए ।**
**मायन्ने असणपाणस्स, अदीणमणसो चरे ।।३।।**

कालीपर्वसंकाशाङ्गः, कृशः धमनीसंततः ।
मात्रज्ञः अशनपानस्य, अदीनमनाश्चरेद् ।।३।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**तओ पुट्ठो पिवासाए, दोगुंच्छी लज्जसंजए ।**
**सीओदगं न सेविज्जा, विअडस्सेसणं चरे ।।४।।**

ततः स्पृष्टः पिपासया, जुगुप्सी लज्जा संयतः ।
शीतोदकं न सेवेत, विकृतस्य एषणां चरेत् ।।४।।

**छिन्नावाएसु पंथेसु, आउरे सुपिवासिए ।**
**परिसुक्कमुहाद्दीणे, तं तितिक्खे परीसहं ।।५।।**

छिन्नापातेषु, पथिषु, आतुरः सुपिपासितः ।
परिशुष्कमुखादीनः, तं तितिक्षेत परीषहम् ।।५।।

**चरंतं विरयं लूहं, सीअं फुसइ एगया ।**
**नाइवेलं मुणी गच्छे, सोच्चा णं जिणसासणं ।।६।।**

चरन्तं विरतं रुक्षं, शीतं स्पृशति एकदा ।
नातिवेलं मुनिर्गच्छेत् श्रुत्वा खलु जिनशासनम् ।।६।।

**न मे निवारणं अत्थि, छवित्ताणं न विज्जइ ।**
**अहं तु अग्गिं सेवामि, इइ भिक्खू न चिंतए ।।७।।**

न मे निवारणं अस्ति, छवित्राणं न विद्यते ।
अहं तु अग्निं सेवे, इति भिक्षुर्न चिन्तयेत् ।।७।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**उसिणप्परिआवेणं, परिदाहेण तज्जिए ।**
**घिंसु वा परिआवेणं, सायं नो परिदेवए ।।८।।**

उष्णपरितापेन, परिदाहेन तर्जितः ।
ग्रीष्मे वा परितापेन, सातं नो परिदेवेत ।।८।।

**उण्हाहि तत्तो मेहावी, सिणाणं नो वि पत्थए ।**
**गायं नो परिसिंचेज्जा, न वीएज्जा य अप्पयं ।।९।।**

उष्णाभितप्तः मेधावी, स्नानं नो अपि प्रार्थयेत् ।
गात्रं नो परिषिश्चेत्, न वीजयेच्च आत्मानम् ।।९।।

**पुट्ठो य दंसमसएहिं, सम एव महामुणी ।**
**नागो संगामसीसे वा, सूरो अभिहणे परं ।।१०।।**

स्पृष्टश्च दंशमशकैः सम एव महामुनिः ।
नागः संग्रामशीर्षे वा, शूरोऽभिहन्यात् परम् ।।१०।।

**न संतसे न वारेज्जा, मणंपि न पओसए ।**
**उवेह न हणे पाणे, भुंजंते मंससोणियं ।।११।।**

न संत्रसेत् न वारयेत्, मनोऽपि न प्रदूषयेत् ।
उपेक्षेत न हन्यात् प्राणिनः, भुञ्जानान् मांसशोणितम् ।।११।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**परिजुन्नेहिं वत्थेहिं, होक्खामि त्ति अचेलए ।**
**अदुवा सचेलए होक्खं, इति भिक्खू न चिंतए ।।१२।।**

परिजीर्णैर्वस्त्रैः, भविष्यामि इति अचलेकः ।
अथवा सचेलको भविष्यामि, इति भिक्षुः न चिन्तयेत् ।।१२।।

**एगया अचेलओ होइ, सचेले आवि एगया ।**
**एअं धम्महिअं नच्चा, नाणी नो परिदेवए ।।१३।।**

एकदा अचेलको भवति, सचेलश्चापि एकदा ।
एतद् धर्महितं ज्ञात्वा, ज्ञानी नो परिदेवेत ।।१३।।

**गामाणुगामं रीअंतं, अणगारं अकिंचणं ।**
**अरई अणुप्पविसे, तं तितिक्खे परीसहं ।।१४।।**

ग्रामानुग्रामं रीयमाणं, अनगारम् अकिञ्चनम् ।
अरतिः अनुप्रविशेत्, तं तितिक्षेत परीषहम् ।।१४।।

**अरइं पिट्ठओ किच्चा, विरए आयरक्खिए ।**
**धम्मारामे निरारम्भे, उवसंते मुणी चरे ।।१५।।**

अरतिं पृष्टतः कृत्वा, विरतः आत्मरक्षितः ।
धर्मारामे निरारम्भः, उपशान्तः मुनिश्चरेत् ।।१५।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**संगो एस मणुस्साणं, जाओ लोगंमि इत्थिओ ।**
**जस्स एआ परिण्णाया, सुकडं तस्स सामण्णं ।।१६।।**

संग एष मनुष्याणां, या लोके स्त्रियः ।
यस्य एताः परिज्ञाताः, सुकृतं तस्य श्रामण्यम् ।।१६।।

**एवमादाय मेहावी, पंकभूआ उ इत्थिओ ।**
**नो ताहिं विणिहन्नेजा, चरेज्जत्तगवेसए ।।१७।।**

एवमादाय मेधावी, पङ्कभूताः स्त्रियः ।
नो ताभिर्विनिहन्यात्, चरेदात्मगवेषकः ।।१७।।

**एग एव चरे लाढे, अभिभूअ परीसहे ।**
**गामे वा नगरे वावि, निगमे वा रायहाणिए ।।१८।।**

एक एव चरेत् लाढः, अभिभूय परीषहान् ।
ग्रामे वा नगरे वाऽपि, निगमे वा राजधान्याम् ।।१८।।

**असमाणो चरे भिक्खू, नेव कुज्जा परिग्गहं ।**
**असंसत्तो गिहत्थेहिं, अणिकेओ परिव्वए ।।१९।।**

असमानश्चरेद् भिक्षुः, नैव कुर्यात् परिग्रहम् ।
असंसक्तो गृहस्थैः, अनिकेतः परिव्रजेत् ।।१९।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**सुसाणे सुन्नगारे वा, रुक्खमूले व एगओ ।**
**अकुक्कुओ निसीएज्जा, न य वित्तासए परं ।।२०।।**

स्मशाने शून्यागारे वा, वृक्षमूले वा एककः ।
अकुत्कुचो निषीदेत्, न च वित्रासयेत् परम् ।।२०।।

**तत्थ से चिट्ठमाणस्स, उवसग्गाभिधारए ।**
**संकाभीओ न गच्छेज्जा, उट्ठित्ता अन्नमासणं ।।२१।।**

तत्र तस्य तिष्ठतः, उपसर्गानभिधारयेत् ।
शङ्काभीतः न गच्छेत्, उत्थायान्यदासनम् ।।२१।।

**उच्चावयाहिं सिज्जाहिं, तवस्सी भिक्खू थामवं ।**
**नाइवेलं विहन्नेज्जा, पावदिट्ठी विहन्नई ।।२२।।**

उच्चावचाभिः शय्याभिः, तपस्वी भिक्षुः स्थामवान् ।
नातिवेलं विहन्यात्, पापदृष्टिर्विहन्यते ।।२२।।

**पइरिक्कमुवस्सयं लद्धुं, कल्लाणं अदुव पावगं ।**
**किमेगराइं करिस्सइ, एवं तत्थऽहियासए ।।२३।।**

प्रतिरिक्तमुपाश्रयं लब्ध्वा, कल्याणं अथवा पापकम् ।
किमेकरात्रं करिष्यति, एवं तत्राध्यासीत ।।२३।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अक्कोसिज्ज परो भिक्खूं, न तेसिं पडिसंजले ।**
**सरिसो होइ बालाणं, तम्हा भिक्खू न संजले ।।२४।।**

आक्रोशेत् परो भिक्षुं, न तस्मै प्रतिसंज्वलेत् ।
सदृशो भवति बालानां, तस्माद् भिक्षुर्न संज्वलेत् ।।२४।।

**सोच्चा णं फरुसा भासा, दारुणा गामकंटया ।**
**तुसिणीओ उवेहेज्जा, न ताओ मणसी करे ।।२५।।**

श्रुत्वा खलु परुषा भाषाः, दारुणा ग्रामकण्टकाः ।
तूष्णीकः उपेक्षेत, न ता मनसि कुर्यात् ।।२५।।

**हओ न संजले भिक्खु, मणंपि न पओसए ।**
**तितिक्खं परमं नच्चा, भिक्खूधम्मं विचिंतए ।।२६।।**

हतो न संज्वलेद् भिक्षुः, मनोऽपि न प्रदूषयेत् ।
तितिक्षां परमां ज्ञात्वा, भिक्षुधर्म विचिन्तयेत् ।।२६।।

**समणं संजयं दंतं, हणेज्जा कोवि कत्थई ।**
**नत्थि जीवस्स नासेत्ति, एवं पेहेज्ज संजए ।।२७।।**

श्रमणं संयतं दान्तं, हन्यात् कोऽपि कुत्रचित् ।
नास्ति जीवस्य नाश इति, एवं प्रेक्षेत संयतः ।।२७।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**दुक्करं खलु भो ! निच्चं, अणगारस्स भिक्खुणो ।**
**सव्वं से जाइअं होइ, नत्थि किंचि अजाइअं ।।२८।।**

दुष्करं खलु भो ! नित्यं, अनगारस्य भिक्षोः ।
सर्वं तस्य याचितं भवति, नास्ति किंचिद् अयाचितम् ।।२८।।

**गोअरग्गपविट्ठस्स, पाणी नो सुप्पसारए ।**
**सेओ अगारवासोत्ति, इइ भिक्खू न चिंतए ।।२९।।**

गोचराग्रप्रविष्टस्य, पाणिः नो सुप्रसारकः ।
श्रेयान् अगारवासः इति, इति भिक्षुर्न चिन्तयेत् ।।२९।।

**परेसु घासमेसेज्जा, भोयणे परिनिट्ठिए ।**
**लद्धे पिंडे अलद्धे वा, नाणुतप्पेज्ज पंडिए ।।३०।।**

परेषु ग्रासं एषयत्, भोजने परिनिष्ठिते ।
लब्धे पिण्डे अलब्धे वा, नानुतप्येत संयतः ।।३०।।

**अज्जेवाहं न लब्भामि, अवि लाभो सुवे सिआ ।**
**जो एवं पडिसंचिक्खे, अलाभो तं न तज्जए ।।३१।।**

अद्यवाहं न लभे, अपि लाभः श्वः स्यात् ।
य एवं प्रतिसमीक्षते, अलाभस्तं न तर्जयेत् ।।३१।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**नच्चा उप्पइयं दुक्खं, वेयणाए दुहट्टिए ।**
**अदीणो ठावए पन्नं, पुट्ठो तत्थ अहियासए ।।३२।।**

ज्ञात्वा उत्पतितं दुःखं वेदनया दुःखार्तितः ।
अदीनः स्थापयेत् प्रज्ञां, स्पृष्टस्तत्र अधिसहेत ।।३२।।

**तेगिच्छं नाभिनंदिज्जा, संचिक्खत्तगवेसए ।**
**एअं खु तस्स सामन्नं जं न कुज्जा न कारए ।।३३।।**

चिकित्सां नाभिनन्देत्, संतिष्ठेत आत्मगवेषकः ।
एतत् खु तस्य श्रामण्यं, यन्न कुर्यात् न कारयेत् ।।३३।।

**अचलेगस्स लूहस्स, संजयस्स तवस्सिणो ।**
**तणेसु सयमाणस्स, होज्जा गायविराहणा ।।३४।।**

अचेलकस्स रूक्षस्य, संयतस्य तपस्विनः ।
तृणेषु शयानस्य, भवति गात्रविराधना ।।३४।।

**आयवस्स निवाएणं, अउला हवइ वेयणा ।**
**एअं नच्चा न सेवंति, तंतुजं तणतज्जिआ ।।३५।।**

आतपस्य निपातेन, अतुला भवति वेदना ।
एवं ज्ञात्वा न सेवन्ते, तन्तुजं तृणतर्जिताः ।।३५।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**किलिण्णगाए मेहावि, पंकेण व रएण वा ।**
**घिंसु वा परितावेण, सायं नो परिदेवए ।।३६।।**

किलन्नगात्रः मेधावी, पङ्केन वा रजसा वा ।
ग्रीष्मे वा परितापेन, सातं नो परिदेवेत ।।३६।।

**वेएज्ज निज्जरापेही आरियं धम्ममणुत्तरं ।**
**जाव सरिरभेओत्ति, जल्लं काएण धारए ।।३७।।**

वेदयेत् निर्जरापेक्षी, आर्यं धर्मं अनुत्तरम् ।
यावत् शरीरभेदः इति जल्लं कायेन धारयेत् ।।३७।।

**अभिवायणमब्भुट्ठाणं सामी कुज्जा निमंतणं ।**
**जे ताइं पडिसेवंति, न तेसिं पीहए मुणी ।।३८।।**

अभिवादनमभ्युत्थानं, स्वामी कुर्यात् निमन्त्रणम् ।
ये तानि प्रतिसेवन्ते, न तेभ्यः स्पृहयेत् मुनिः ।।३८।।

**अणुक्कसाई अप्पिच्छे, अन्नाणेसि अलोलुए ।**
**रसेसु नाणुगिज्झिज्जा, नाणुतप्पेज्ज पण्णवं ।।३९।।**

अणुकषायी अल्पेच्छः, अज्ञातैषी अलोलुपः ।
रसेषु नानुगृध्येत्, नानुतप्येत् प्रज्ञावान् ।।३९।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**से अ णूणं मए पुव्वं कम्माऽणाणफला कडा ।**
**जेणाहं नाभिजाणामि, पुट्ठो केणई कण्हुई ।।४०।।**

**अह पच्छा उइज्जंति, कम्माऽणाणफला कडा ।**
**एवमस्सासि अप्पाणं, णच्चा कम्मविवागयं ।।४१।।**

अथ नून मया पूर्वं, कर्माणि अज्ञानफलानि कृतानि ।
येनाहं नाभिजानामि, पृष्टः केनचित् कस्मिंश्चित् ।।४०।।

अथ पश्चाद् उदीर्यन्ते, कर्माणि अज्ञानफलानि कृतानि।
एवमाश्वासयात्मानं, ज्ञात्वा कर्मविपाककम् ।।४१।।

**।। युग्गम् ।।**

**निरट्ठगं मि विरओ, मेहुणाओ सुसंवुडो ।**
**जो सक्खं नाभिजाणामि, धम्मं कल्लाण पावगं ।।४२।।**

निरर्थकं अहं विरतः, मैथुनात् सुसंवृत्तः ।
यः साक्षात् नाभिजानामि, धर्म कल्याणं पापकम् ।।४२।।

**तवोवहाणमादाय, पडिमं पडिवज्जओ ।**
**एवं पि विहरओ मे, छउमं न नियट्टइ ।।४३।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

तपउपधानमादाय, प्रतिमां प्रतिपद्यमानस्य ।
एवमपि विहरतो मे, छद्म न निवर्तते ।।४३।।

**नत्थि नूणं परे लोए, इड्ढी वा वि तवस्सिणो ।**
**अदुवा वंचिओम्हि त्ति, इइ भिक्खू न चिंतए ।।४४।।**

नास्ति नूनं परो लोकः ऋद्धिर्वाऽपि तपस्विनः ।
अथवा वञ्चितोऽस्मीति, इति भिक्षुर्न चिन्तयेत् ।।४४।।

**अभू जिणा अत्थि जिणा, अदुवा वि भविस्सइ ।**
**मुसं ते एव माहंसु, इइ भिक्खू न चिंतए ।।४५।।**

अभूवन् जिनाः सन्ति जिनाः अथवाऽपि भविष्यन्ति ।
मृषा ते एवमाहुः, इति भिक्षुर्न चिन्तयेत् ।।४५।।

**एए परीसहा सव्वे, कासवेणं पवेइआ ।**
**जे भिक्खू ण विहण्णेज्जा, पुट्ठो केणइ कण्हुए ।।४६।।**

**।। त्तिबेमि ।।**

एते परीषहाः सर्वे काश्यपेन प्रवेदिताः ।
यान् भिक्षुर्न विहन्येत, स्पृष्टः केनाऽपि कस्मिंश्चित् ।।४६।।

।। इति ब्रवीमि ।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

# श्री चतुरंगीय अध्ययन-३

**चत्तारि परमंगाणि, दुल्लहाणीह जंतुणो ।**
**माणुसत्तं सुइ सद्धा, संजमम्मि अ वीरिअं ।।१।।**

चत्वारि परमाङ्गानि, दुर्लभानि इह जन्तोः ।
मानुषत्वं श्रुतिः श्रद्धा, संयमे च वीर्यम् ।।१।।

**समावन्ना ण संसारे, नाणागुत्तासु जाइसु ।**
**कम्मा नाणाविहा कट्टु, पुढो विस्संभिआ पया ।।२।।**

समापन्नाः खलु संसारे, नानागोत्रासु जातिषु ।
कर्माणि नानाविधानि कृत्वा, पृथक् विश्वभृतः प्रजाः ।।२।।

**एगया देवलोएसु, नरएसु वि एगया ।**
**एगया आसुरं कायं, अहाकम्मेहिं गच्छइ ।।३।।**

एकदा देवलोकेषु, नरकेष्वपि एकदा ।
एकदा आसुरं कायं, यथाकर्मभिः गच्छति ।।३।।

**एगया खत्तिओ होइ, तओ चंडाल बुक्कसो ।**
**तओ कीड पयंगो अ, तओ कुंथू पिवीलिआ ।।४।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

एकदा क्षत्रियो भवति, ततश्चण्डालः बुक्कसः ।
ततः कीटः पतङ्गश्च, ततः कुन्थुः पिपीलिका ।।४।।

**एवमावट्टजोणीसु, पाणिणो कम्मकिव्विसा ।**
**न निव्विज्जंति संसारे, सव्वट्ठेसु व खत्तिआ ।।५।।**

एवं आवर्तयोनिषु, प्राणिनः कर्मकिल्विषाः ।
न निर्विद्यन्ते संसारे, सर्वार्थेषु इव क्षत्रियाः ।।५।।

**कम्मसंगेहिं संमूढा, दुक्खिआ बहुवेअणा ।**
**अमाणुसासु जोणीसु, विणिहम्मंति पाणिणो ।।६।।**

कर्मसंगैः संमूढाः दुःखिता बहुवेदनाः ।
अमानुषीषु योनिषु, विनिहन्यन्ते प्राणिनः ।।६।।

**कम्माणं तु पहाणाए, आणुपुव्विं कयाइ उ ।**
**जीवा सोहिमणुप्पत्ता, आययंति मणुस्सयं ।।७।।**

कर्मणां तु प्रहाण्या, आनुपूर्व्या कदाचित्तु ।
जीवाः शुद्धिमनुप्राप्ताः, आददते मनुष्यताम् ।।७।।

**माणुस्सं विग्गहं लद्धुं, सुइ धम्मस्स दुल्लहा ।**
**जं सुच्चा पडिवज्जंति, तवं खंतिमहिंसयं ।।८।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

मानुष्यं विग्रहं लब्ध्वा, श्रुतिधर्मस्य दुर्लभा ।
यं श्रुत्वा प्रतिपद्यन्ते, तपः क्षान्तिं अहिंस्त्रताम् ।।८।।

**आहच्च सवणं लद्धुं सद्धा परमदुल्लहा ।**
**सोच्चा नेआउयं मग्गं, बहवे परिभस्सइ ।।९।।**

कदाचित् श्रवणं लब्ध्वा, श्रद्धा परमदुर्लभा ।
श्रुत्वा नैयायिकं मार्गं, बहवः परिभ्रश्यन्ति ।।९।।

**सुइं च लद्धुं सद्धं च, वीरिअं पुण दुल्लहं ।**
**बहवे रोअमाणावि, नो य णं पडिवज्जए ।।१०।।**

श्रुति च लब्ध्वा श्रद्धां च, वीर्यं पुनर्दुर्लभम् ।
बहवः रोचमाना अपि, नो एनं प्रतिपद्यन्ते ।।१०।।

**माणुसत्तम्मि आयाओ, जो धम्मं सोच्च सद्दहे ।**
**तवस्सि वीरिअं लद्धुं, संवुडे णिध्धुणे रयं ।।११।।**

मानुष्यत्वे आयातो, यो धर्मं श्रुत्वा श्रद्धत्ते ।
तपस्वी वीर्यं लब्ध्वा, संवृतः निर्धुनोति रजः ।।११।।

**सोही उज्जुयभूअस्स, धम्मो सुद्धस्स चिट्ठइ ।**
**निव्वाणं परमं जाइ, घयसित्तिव्व पावए ।।१२।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

शुद्धिः ऋजुभूतस्य, धर्मः शुद्धस्य तिष्ठति ।
निर्वाणं परमं याति, धृतसिक्त इव पावकः ।।१२।।

**विगिंच कम्मुणो हेउं, संचिणु खंतिए ।**
**पाढवं सरीरं हिच्चा, उड्ढं पक्कमइ दिसं ।।१३।।**

विवेचय कर्मणः हेतु, यशः संचिनु क्षान्त्या ।
पार्थिवं शरीरं हित्वा, ऊर्ध्वां प्रक्रामति दिशम् ।।१३।।

**विसांलिसेहिं सीलेहिं, जक्खा उत्तर-उत्तरा ।**
**महासुक्का व दिप्पंता, मन्नंता अपुणच्चवं ।।१४।।**

**अप्पिया देवकामाणं, कामरूवविउव्विणो ।**
**उड्ढं कप्पेसु चिट्ठंति, पुव्वा वाससया बहु ।।१५।।**

**।। युग्मम् ।।**

विसदृशैः शीलेः यक्षाः उत्तरोउत्तराः ।
महाशुक्लैव दीप्यमानाः, मन्यमाना अपुनश्च्यवम् ।।१४।।

अर्पिता देवकामेभ्यः, नामरुपविकुर्वाणाः ।
उर्ध्वं कल्पेषु तिष्ठन्ति, पूर्वाणि वर्षशताति बहूनि ।।१५।।

।। युग्मम् ।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**तत्थ ठिच्चा जहाठाणं, जक्खा आउक्खये चुया ।**
**उवेंति माणुसं जोणिं, से दसंगे अभिजायइ ।।१६।।**

तत्र स्थित्वा यथास्थानं, यक्षा आयुः क्षये च्युताः ।
उपयान्ति मानुषीं योनिं, स दशाङ्गोऽभिजायते ।।१६।।

**खेतं वत्थुं हिरण्णं च, पसवो दास-पोरुसं ।**
**चत्तारि कामखंधाणि, तत्थ से उववज्जइ ।।१७।।**

क्षेत्रं वास्तु हिरण्यं च, पशवो दासपौरुषेयं ।
चत्वारः कामस्कन्धाः, तत्र स उपपद्यते ।।१७।।

**मित्तवं नाइवं होइ, उच्चागोए य वण्णवं ।**
**अप्पायंके महापण्णे, अभिजाए जसो बले ।।१८।।**

मित्रवान् ज्ञातिमान् भवति, उच्चैर्गोत्रश्च वर्णवान् ।
अल्पातङ्क महाप्रज्ञः अभिजातः यशस्वी बली ।।१८।।

**भुच्चा माणुस्सए भोए, अप्पडिरूवे अहाउयं ।**
**पुव्वं विसुद्धसद्धम्मे, केवलं बोहिबुज्झिया ।।१९।।**
**चउरंगं दुल्लहं णच्चा, संजमं पडिवज्जिया ।**
**तवसा धुअकम्मंसे, सिद्धे हवइ सासए त्ति बेमि ।।२०।।**

**।। युग्मम् ।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

भुक्त्वा मानुष्यकान् भोगान्, अप्रतिरूपः यथायुष्कम् ।
पूर्व विशुद्धसद्धर्मः, केवलं बोधिं बुद्द्धवा ।।१९।।

चतुरङ्गं दुर्लभं ज्ञात्वा, संयमं प्रतिपद्य ।
तपसा धुतकर्मांशः, सिद्धो भवति शाश्वतः इति ब्रबीमि ।।२०।।

।। युग्मम् ।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

# श्री प्रमादाप्रमादाध्ययन-४

**असंखययं जीवियं मा पमायए,**
**जरोवणीअस्स हु नत्थि ताणं ।**
**एवं विआणाहि जणे पमत्ते,**
**किं नु विहिंसा अजया गहिंति ।।१।।**

असंस्कृतं जीवितं मा प्रमादीः,
जरोपनीतस्य हु नास्ति त्राणम् ।
एतं विजानीहि जनाः प्रमत्ताः,
किं नु विहिंस्रा अयताः ग्रहीष्यन्ति ।।१।।

**जे पावकम्मेहि धणं मणूसा,**
**समाययंति अमइं गहाय ।**
**पहाय ते पासपयट्टिए नरे,**
**वेराणुबद्धा नरयं उविंति ।।२।।**

ये पापकर्मभिः धनं मनुष्याः,
समाददते अमतिं गृहीत्वा।
प्रहाय ते पाशप्रवृत्ताः नराः,
वैरानुबद्धाः नरकं उपयान्ति ।।२।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**तेणे जहा संधिमुहे गहीए,**

**सकम्मुणा किच्चइ पावकारी ।**

**एवं पया पेच्च इहं च लोए,**

**कडाण कम्माण न मुक्खु अत्थि ।।३।।**

स्तेनो यथा सन्धिमुखे गृहीतः,

स्वकर्मणा कृत्यते पापकारी ।

एवं प्रजा प्रेत्य इह च लोके,

कृतानां कर्मणां न मोक्षोऽस्ति ।।३।।

**संसारमावण्ण परस्स अट्ठा,**

**साहारणं जं च करेइ कम्मं ।**

**कम्मस्स ते तस्स उ वेअकाले,**

**न बंधवा बंधवयं उविंति ।।४।।**

संसारमापन्नः परस्य अर्थाय,

साधारणं यञ्च करोति कर्म ।

कर्मणस्ते तस्य तु वेदकाले,

न बान्धवाः बान्धवतां उपयन्ति ।।४।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**वित्तेण ताणं न लभे पमत्ते,**

**इमम्मि लोए अदुवा परत्था ।**

**दीवप्पणट्ठे व अणंतमोहे,**

**णेआउयं दट्ठुमदट्ठुमेव ।।५।।**

वित्तेन त्राणं न लभते प्रमत्तः,

अस्मिंल्लोके अथवा परत्र।

दीपप्रनष्ट इव अनन्तमोहः,

नैयायिक दृष्ट्वा अदृष्ट्वैव ।।५।।

**सुत्तेसु यावी पडिबुद्धजीवी, न वीससे पंडिए आसुपन्ने ।**
**घारो मुहुत्ता अबलं शरीरं भारंडपक्खी व चरेऽपमत्तो ।।६।।**

सुप्तेषु चापि प्रतिबुद्धजीवी, न विश्वसेत् पण्डित आशुप्रज्ञः ।
घोरा मुहूर्ता अबलं शरीरं, भारण्डपक्षीव चरेदप्रमत्तः ।।६।।

**चरे पयाइं परिसंकमाणो,**

**जं किंचि पासं इह मन्नमाणो ।**

**लाभंतरे जीविय बूहइत्ता,**

**पच्छा परिन्नाय मलावधंसी ।।७।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

चरेत् पदानि परिशङ्कमानः,

यत् किंचेत् पाशं इह मन्यमानः ।

लाभान्तरे जीवितं बृंहयित्वा,

पश्चात् परिज्ञाय मलापध्वंसि ।।७।।

**छंदं निरोहेण उवेइ मोक्खं,**

**आसे जहा सिक्खिअवम्मधारी ।**

**पुव्वाइं वासाइं चरऽपमत्तो,**

**तम्हा मुणी खिप्पमुवेइ मोक्खं ।।८।।**

छन्दोनिरोधेन उपैति मोक्षं,

अश्वो यथा शिक्षितवर्मधारी।

पूर्वाणि वर्षाणि चरेदप्रमत्तः,

तस्माद् मुनिः क्षिप्रमुपैति मोक्षम् ।।८।।

**स पुव्वमेवं न लभेज्ज पच्छा,**

**एसोवमा सासयवाइआणं ।**

**विसीअइ सीढिले आउअम्मि,**

**कालोवणीए, सरीरस्स भेए ।।९।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

स पूर्वमेवं न लभेत पश्चात्, एषोपमा शाश्वतवादिनाम् ।
विषीदति शिथिले आयुषि, कालोपनीते शरीरस्य भेदे ।।९।।

**खिप्पं न सक्केइ विवेगमेउं,**

**तम्हा समुट्ठाय पहाय कामे ।**

**समेच्च लोगं समया महेसी,**

**अप्पारक्खी व चरऽप्पमत्तो ।।१०।।**

क्षिप्रं न शक्नोति विवेकमेतुं,

तस्मात् समुत्थाय प्रहाय कामान् ।

समेत्य लोकं समतया महर्षिः,

आत्मरक्षीव चराप्रमत्तः ।।१०।।

**मुहुं मुहुं मोहगुणे जयंतं,**

**अणेगरूवा समणं चरंतं ।**

**फासा फुसन्ती असमंजसं च,**

**न तेसु भिक्खु मणसा पउस्से ।।११।।**

मुहुर्मुहुः मोहगुणान् जयन्तं, अनेकरूपाः श्रमणं चरन्तम्।
स्पर्शाः स्पृशन्ति असमंजसं च, न तेषु भिक्षुर्मनसा प्रद्विष्यात् ।।११।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**मंदा य फासा बहुलोहणिज्जा,**

**तहप्पगारेसु मणं न कुज्जा ।**

**रक्खिज्ज कोहं विणइज्ज माणं,**

**मायं न सेवेज्ज पयहिज्ज लोहं ।।१२।।**

मन्दाश्च स्पर्शा बहुलोभनीयाः,

तथाप्रकारेषु मनो न कुर्यात् ।

रक्षेत् क्रोधं विनयेत् मानं,

मायां न सेवेत प्रजह्यात् लोभम् ।।१२।।

**जे संखया तुच्छ परप्पवाई,**

**ते पिज्जदोसाणुगया परज्झा ।**

**एए अहम्मेत्ति दुगुंछमाणो,**

**कंखे गुणे जाव सरीरभेओ त्ति बेमि ।।१३।।**

ये संस्कृताः तुच्छाः परप्रवादिनः,

ते प्रेमद्वेषानुगता परवशाः ।

एते अधर्मा इति जुगुप्समानः,

काङ्क्षेद् गुणान् यावतशरीरभेदः इति ब्रविमी ।।१३।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

# श्री अकाममरणीयाध्ययन-५

**अण्णवंसि महोहंसि, एगे तिण्णे दुरुत्तरे ।**
**तत्थ एगे महापन्ने, इमं पण्हमुदाहरे ।।१।।**

अर्णवे महौघे, एकस्तीर्णः दुरुत्तरे ।
तत्र एको महाप्रज्ञः, इमं प्रश्नम् उदाहरत् ।।१।।

**संति मे य दुवे ठाणा, अक्खाया मरणंतिया ।**
**अकाममरणं चेव, सकाममरणं तहा ।।२।।**

स्तः इमे च द्वे स्थाने, आख्याते मारणान्तिके ।
अकाममरणं चैव, सकाममरणं तथा ।।२।।

**बालाणं अकामे तु, मरणं असइं भवे ।**
**पंडियाणं सकामं तु, उक्कोसेण सइं भवे ।।३।।**

बालानां अकामं तु, मरणं असकृद् भवेत् ।
पण्डितानां सकामं तु, उत्कर्षेण सकृद् भवेत् ।।३।।

**तत्थिमं पढमं ठाणं, महावीरेण देसियं ।**
**कामगिद्धे जहाबाले, भिसं कूराइं कुव्वई ।।४।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

तत्रेदं प्रथमं स्थानं, महावीरेण देशितम् ।
कामगृद्धो यथा बालः, भृशं क्रूराणि करोति ।।४।।

**जे गिद्धे कामभोएसु, एगे कूडाय गच्छइ ।**
**न मे दिट्ठे परे लोए, चक्खुदिट्ठा इमा रई ।।५।।**

यो गृद्धः कामभोगेषु एकः कूटाय गच्छति ।
न मया दृष्टः परो लोकः चक्षुर्दृष्टा इयं रतिः ।।५।।

**हत्थागया इमे कामा, कालिया जे अणागया ।**
**को जाणइ परे लोए, अत्थि वा नत्थि वा पुणो ।।६।।**

हस्तागता इमे कामाः, कालिका ये अनागताः ।
को जानाति परो लोकः, अस्ति वा नास्ति वा पुनः ।।६।।

**जणेण सद्धिं होक्खामि, इइ बाले पगब्भई ।**
**कामभोगाणुराएणं, केसं संपडिवज्जई ।।७।।**

जनेन सार्धं भविष्यामि, इति बालः प्रगल्भते ।
कामभोगानुरागेण, क्लेशं संप्रतिपद्यते ।।७।।

**तओ से दंडं समारभइ, तसेसु थावरेसु य ।**
**अट्ठाए य अणट्ठाए, भूयग्गामं विहिंसई ।।८।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

ततः स दंण्डें समारभते, त्रसेषु स्थावरेषु च ।
अर्थाय च अनर्थाय, भूतग्रामं विहिनस्ति ।।८।।

**हिंसे बाले मुसावाई, माइल्ले पिसुणे सढे ।**
**भुंजमाणे सुरं मंसं, सेयमेयंति मन्नइ ।।९।।**

हिंस्रः बालो मृषावादी, मायावी पिशुनः शठः ।
भुञ्जानः सुरां मांसं श्रेयः एतदिति मन्यते ।।९।।

**कायसा वयसा मत्ते, वित्ते गिद्धे य इत्थिसु ।**
**दुहओ मलं संचिणइ, सिसुणागु व्व मट्टियं ।।१०।।**

कायेन वचसा मत्तो, वित्ते गृद्धश्च स्त्रीषु ।
द्विधा मलं संचिनोति, शिशुनाग इव मृत्तिकाम् ।।१०।।

**तओ पुट्ठो आयंकेणं, गिलाणो परितप्पई ।**
**पभीओ परलोगस्स, कम्माणुप्पेही अप्पणो ।।११।।**

ततः स्पृष्टः आतङ्केन, ग्लानः परितप्यते ।
प्रभीतः परलोकस्य, कर्मानुप्रेक्षी आत्मनः ।।११।।

**सुया मे नरए ठाणा, असीलाणं च जा गई ।**
**बालाणं कूरकम्माणं, पगाढा जत्थ वेयणा ।।१२।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

श्रुतानि मे नरके स्थानानि, अशीलानां च या गतिः ।
बालानां क्रूरकर्मणां, प्रगाढाः यत्र वेदनाः ।।१२।।

**तत्थोववाइयं ठाणं, जहा मे तमणुस्सुयं ।**
**अहाकम्मेहिं गच्छन्तो, सो पच्छा परितप्पइ ।।१३।।**

तत्रौपपातिकं स्थानं, यथा मे तदनुश्रुतम् ।
यथाकर्मभिर्गच्छन् स पश्यात् परितप्यते ।।१३।।

**जहा सागडिओ जाणं, समं हिच्चा महापहं ।**
**विसमं मग्गमोइण्णो, अक्खे भग्गंमि सोयइ ।।१४।।**

**एवं धम्मं विउक्कम्म, अहम्मं पडिवज्जिया ।**
**बाले मच्चुमुहं पत्ते, अक्खे भग्गे व सोयइ ।।१५।।**

**।। युग्मम् ।।**

यथा शाकटिको जानन्, समं हित्वा महापथम् ।
विषमं मार्गमवतीर्णः, अक्षे भग्ने शोचति ।।१४।।

एवं धर्मं व्युत्क्रम्य, अधर्मं प्रतिपद्य ।
बालः मृत्युमुखं प्राप्तः, अक्षे भग्न इव शोचति ।।१५।।

**।। युग्मम् ।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**तओ से मरणंतम्मि, बाले संतस्सई भया ।**
**अकाममरणं मरइ, धुत्ते वा कलिणा जिए ।।१६।।**

ततः स मरणान्ते, बालः संत्रस्यति भयात् ।
अकाममरणेन म्रियते, धूर्त इव कलिना जितः ।।१६।।

**एयं अकाममरणं बालाणं तु पवेइयं ।**
**एत्तो सकाममरणं, पंडिआणं सुणेह मे ।।१७।।**

एतद् अकाममरणं, बालानां तु प्रवेदितम् ।
इतः सकाममरणं, पंडितानां शृणुत मे ।।१७।।

**मरणं पि सपुण्णाणं, जहा मे तमणुस्सयं ।**
**विप्पसण्ण-मणाघायं, संजयाण वुसीमओ ।।१८।।**

मरणमपि सपुष्यानां, यथा मे यदनुश्रुतम् ।
विप्रसन्नमनाघातं, संयतानां वश्यवताम् ।।१८।।

**ण इमं सव्वेसु भिक्खुसु, न इमं सव्वेसु गारिसु ।**
**नाणासीला अगारत्था, विसमसीला च भिक्खुणो ।।१९।**

नेदं सर्वेषु भिक्षुषु, नेदं सर्वेषु अगारिषु ।
नानाशीला अगारस्थाः, विषमशीलाश्च भिक्षवः ।।१९।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**संति एगेहिं भिक्खूहिं, गारत्था संजमुत्तरा ।**
**गारत्थेहि अ सव्वेहिं, साहवो संजमुत्तरा ।।२०।।**

सन्ति एकेभ्यः भिक्षुभ्यः अगारस्थाः संयमोत्तराः ।
अगारस्थेभ्यश्च सर्वेभ्यः, साधवः संयमोत्तराः ।।२०।।

**चीराजिणं नगिणिणं, जडी संघाडी मुंडिणं ।**
**एयाइं वि न ताइंति, दुस्सीलं परियागयं ।।२१।।**

चीराजिनं नाग्न्यं, जटित्वं संघाटी मुण्डत्वम् ।
एतान्यपि न त्रायन्ते, दुःशीलं पर्यायागतम् ।।२१।।

**पिंडोलएव्व दुस्सीले, नरगाओ न मुच्चई ।**
**भिक्खाए वा गिहत्थे वा, सुव्वए कम्मई दिवं ।।२२।।**

पिण्डावलगो वा दुःशीलः, नरकात् न मुच्यते ।
भिक्षादो वा गृहस्थो वा, सुव्रतः क्रामति दिवम् ।।२२।।

**अगारि सामाइयंगाइं, सड्ढी काएण फासए ।**
**पोसहं दुहओ पक्खं, एगरायं न हावए ।।२३।।**

अगारी सामायिकाङ्गानि, श्रद्धी कायेन स्पृशति ।
पौषधं द्वयोरपि पक्षयोः, एकरात्रिं न हापयेत् ।।२३।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**एवं सिक्खासमावण्णे, गिहवासे वि सुव्वए ।**
**मुच्चई छविपव्वाओ, गच्छे जक्खसलोगयं ।।२४।।**

एवं शिक्षासमापन्नः गृहवासेऽपि सुव्रतः ।
मुच्यते छविपर्वतः गच्छेत् यक्षसलोकताम् ।।२४।।

**अह जे संवुडे भिक्खू, दुण्हमन्नयरे सिया ।**
**सव्वदुक्खप्पहिणे वा, देवे वावि महिड्ढिए ।।२५।।**

अथ यः संवृतः भिक्षुः, द्वयोरन्यतरः स्यात् ।
सर्वदुःखप्रहीणो वा, देवो वाऽपि महर्द्धिकः ।।२५।।

**उत्तराइं विमोहाइं, जुइमंताणुपुव्वसो ।**
**समाइण्णाइं जक्खेहिं, आवासाइं जसंसिणो ।।२६।।**

उत्तराः विमोहाः, द्युतिमन्तः अनुपूर्वतः ।
समाकीर्णाः यक्षैः, आवासाः यशस्विनः ।।२६।।

**दीहाउया इड्ढिमंता, समिद्धा कामरूविणो ।**
**अहुणोववन्नसंकासा, भुज्जो अच्चिमालिप्पभा ।।२७।।**

दीर्घायुषः ऋद्धिमन्तः, समिद्धाः कामरूपिणः ।
अधुनोपपन्नसंकाशाः, भूयोऽर्चिर्मालिप्रभाः ।।२७।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**ताणि ठाणाणि गच्छंति, सिक्खित्ता संजमं तवं ।**
**भिक्खाए वा गिहत्थे वा, जे संति परिनिव्वुआ ।।२८।।**

तानि स्थानानि गच्छन्ति, शिक्षित्वा सैयमं तपः ।
भिक्षादा वा गृहस्था वा, ये सन्ति परिनिर्वृत्ताः ।।२८।।

**तेसिं सोच्चा सपुज्जाणं, संजयाणं वुसीमओ ।**
**न संतंसंति मरणंते, सीलवंता बहुस्सुआ ।।२९।।**

तेषां श्रुत्वा सत्पूज्यानां, संयतानां वश्यवताम् ।
न सन्त्रस्यन्ति मरणान्ते, शीलवन्तो बहुश्रुताः ।।२९।।

**तुलिआ विसेसमादाय, दयाधम्मस्स खंतिए ।**
**विप्पसीएज्ज मेहावी, तहाभूएण अप्पणा ।।३०।।**

तोलयित्वा विशेषमादाय, दयाधर्मस्य क्षान्त्या ।
विप्रसीदेत् मेधावी, तथाभूतेन आत्मना ।।३०।।

**तओ काले अभिप्पेए, सड्ढी तालिसमंतिए ।**
**विणइज्ज लोमहरिसं भेअं देहस्स कंखए ।।३१।।**

ततः काले अभिप्रेते, श्रद्धी तादृशमन्तिके ।
विनयेत् रोमहर्षं, भेदं भेदस्य काङ्क्षेत् ।।३१।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अह कालम्मि संपत्ते, आघायाय समुस्सयं ।**
**सकाममरणं मरइ, तिण्हमण्णयरं मुणि त्ति बेमि ।।३२।।**

अथ काले संप्राप्ते, आघाताय समुच्छ्रयम् ।
सकाममरणं म्रियते, त्रयाणां अन्यतरद् मुनिरिति ब्रवीमि ।।३२।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

# श्री क्षुल्लकनिर्ग्रन्थीयाध्ययन-६

**जावंतऽविज्जा पुरिसा, सव्वे ते दुक्खसंभवा ।**
**लुप्पन्ति बहुसो मूढा, संसारंमि अणंतए ।।१।।**

यावन्तोऽविद्याः पुरुषाः सर्वे ते दुःखसम्भवाः ।
लुप्यन्ते बहुशो मुढाः, संसारे अनन्तके ।।१।।

**समिक्खं पंडिए तम्हा, पासजाइपहे बहू ।**
**अप्पणा सच्चमेसिज्जा, मित्तिं भूएसु कप्पए ।।२।।**

समीक्ष्य पण्डितस्तस्मात् पाशजातिपथान् बहून् ।
आत्मना सत्यमेषयेत्, मैत्री भूतेषु कल्पयेत् ।।२।।

**माया पिआ ण्हुसा भाया, भज्जा पुत्ता य ओरसा ।**
**नालं ते मम ताणाय, लुप्पंतस्स सकम्मुणा ।।३।।**

माता पिता स्नुषा भ्राता, भार्या पुत्राश्च औरसाः ।
नालं ते मम त्राणाय, लुप्यमानस्य स्वकर्मणा ।।३।।

**एअमट्ठं संपेहाए, पासे समिअदंसणे ।**
**छिंद गेहिं सिणेहं च, न कंखे पुव्वसंथवं ।।४।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

एतमर्थं सप्रेक्षया, पश्येत् शमितदर्शनः ।
छिन्द्यात् गृद्धिं स्नेहं च, न काङ्क्षेत् पूर्वसंस्तवम् ।।४।।

**गवासं मणिकुंडलं, पसवो दासपोरुसं ।**
**सव्वमेअं चइत्ताणं, कामरूपी भविस्ससि ।।५।।**

गवाश्वं मणिकुंडलं, पशवो दासपौरुषम् ।
सर्वमेतत् त्यक्त्वा खलु, कामरूपी भविष्यसि ।।५।।

**थावरं जंगमं चेव, धणं धन्नं उवक्खरं ।**
**पच्चमाणस्स कम्मेहिं, नालं दुक्खाओ मोअणे ।।६।।**

स्थावरं जङ्गमं चैव, धनं धान्यं उपस्करः ।
पच्यमानस्य कर्मभिः नालं दुःखाद् मोचने ।।६।।

**अज्झत्थं सव्वओ सव्वं, दिस्सं पाणे पिआयए ।**
**न हणे पाणिणो पाणे, भयवेराओ उवरए ।।७।।**

अध्यात्मं सर्वतः सर्वं, दृष्ट्वा प्राणान् प्रियात्मकान् ।
न हन्यात् प्राणिनः प्राणान्, भयवैराद् उपरतः ।।७।।

**आदाणं नरयं दिस्स, नायइज्ज तणामवि ।**
**दोगुंछी अप्पणो पाए, दिन्नं भुंजिज्ज भोअणं ।।८।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

आदानं नरकं दृष्ट्वा, नाददीत तृणमपि ।
जुगुप्सी आत्मनः पात्रे, दत्तं भुञ्जीत भोजनम् ।।८।।

**इहमेगे उ मन्नंति, अपच्चक्खाय पावगं ।**
**आचरिअं विदित्ताणं, सव्वदुक्खा विमुच्चइ ।।९।।**

इह एके तु मन्यन्ते, अप्रत्याख्याय पापकम् ।
आचारिकं विदित्त्वा खलु, सर्वदुःखेभ्यो विमुच्यते ।।९।।

**भणंता अकरिंता य, बंधमोक्खपइण्णिणो ।**
**वायाविरिअमेत्तेणं, समासासंति अप्पयं ।।१०।।**

भणन्तः अकुर्वन्तश्च, बन्धमोक्षप्रतिज्ञिनः ।
वाग्वीर्यमात्रेण, समाश्वासयन्ति आत्मानम् ।।१०।।

**ण चित्ता तायए भासा, कओ विज्जाणुसासणं ।**
**विसण्णा पावकम्मेहिं, बाला पंडिअमाणिणो ।।११।।**

न चित्रा त्रायते भाषा, कुतो विद्यानुशासनम् ।
विषण्णाः पापकर्मभिः, बालाः पण्डितमानिनः ।।११।।

**जे केइ सरीरे सत्ता, वण्णेरूवे अ सव्वसो ।**
**मणसा कायवक्केणं, सव्वे ते दुक्खसंभवा ।।१२।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

ये केचित् शरीरे सक्ताः, वर्णे रुपे च सर्वशः ।
मनसा कायवाक्येन, सर्वे ते दुःखसम्भवाः ।।१२।।

**आवण्णा दीहमद्धाणं, संसारंमि अणंतए ।**
**तम्हा सव्वदिसं पस्स, अप्पमत्तो परिव्वए ।।१३।।**

आपन्नाः दीर्घमध्वानं, संसारे अनन्तके ।
तस्मात् सर्वदिशः पश्यन्, अप्रमत्तः परिव्रजे ।।१३।।

**बहिआ उड्ढमादाय, नावकंखे कयाइवि ।**
**पुव्वकम्मक्खयट्ठाए, इमं देहं समुद्धरे ।।१४।।**

बहिः ऊर्ध्वमादाय, नावकाङ्क्षेत् कदाचिदपि ।
पूर्वकर्मक्षयार्थं, इमं देहं समुद्धरेत् ।।१४।।

**विगिंच कम्मुणो हेउं, कालकंखी परिव्वए ।**
**मायं पिंडस्स पाणस्स, कडं लद्धूण भक्खए ।।१५।।**

विविच्य कर्मणो हेतुं, कालकाङ्क्षी परिव्रजेत् ।
मात्रां पिण्डस्य पानस्य, कृतां लब्ध्वा भक्षयेत् ।।१५।।

**सन्निहिं च न कुव्विज्जा, लेवमायाइ संजए ।**
**पक्खी पत्तं समादाय, निरविक्खो परिव्वए ।।१६।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

सन्निधिं च न कुर्यात्, लेपमात्रया संयतः ।
पक्षी पत्रं समादाय, निरपेक्षः परिव्रजेत् ।।१६।।

**एसणासमिओ लज्जू, गामे अनियओ चरे ।**
**अप्पमत्तो पमत्तेहिं, पिंडवायं गवेसए ।।१७।।**

एषणासमितो लज्जालुः, ग्रामे अनियतश्चरेत् ।
अप्रमत्तः प्रमत्तेभ्यः, पिण्डपातं गवेषयेत् ।।१७।।

**एवं से उदाहु अणुत्तरनाणी,**
**अणुत्तरदंसी अणुत्तरनाणदंसणधरे ।**
**अरहा णायपुत्ते भगवं वेसालिए,**
**विआहिए त्ति बेमि ।।१८।।**

एवं स उदाहृतवान्, अनुत्तरज्ञानी,
अनुत्तरदर्शी, अनुत्तरज्ञानदर्शनधरः ।
अर्हन् ज्ञातपुत्रः भगवान् वैशालिकः,
व्याख्याता इति ब्रवीमि ।।१८।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

# श्री उरभ्रीयाध्ययन-७

**जहाऽऽएसं समुद्दिस्स, कोइ पोसिज्ज एलयं ।**
**ओअणं जवसं दिज्जा, पोसिज्जावि सयंगणे ।।१।।**

यथाऽऽदेशं समुद्दिश्य कोऽपि पोषयेत् एडकम् ।
ओदनं यवसं दद्यात्, पोषयेदपि स्वकाङ्गणे ।।१।।

**तओ से पुट्ठे परिवूढे, जायमेए महोदरे ।**
**पीणिए विउले देहे, आएसं परिकंखए ।।२।।**

ततः स पुष्टः परिवृढः, जातमेदाः महोदरः ।
प्रीणितः विपुले देहे, आदेशं परिकाङ्क्षति ।।२।।

**जाव न इए आएसे, ताव जीवइ सेऽदुहि ।**
**अह पत्तंमि आएसे, सीसं छित्तूण भुज्जइ ।।३।।**

यावन्न एति आदेशः, यावज्जीवति सोऽदुःखी ।
अथ प्राप्ते आदेशे, शिरश्छित्त्वा भुज्यते ।।३।।

**जहा खलु से उरब्भे, आएसाए समीहिए ।**
**एवं बाले अहम्मिट्ठे, ईहए नरयाउयं ।।४।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

यथा खलु स उरभ्रः, आदेशाय समीहितः ।
एवं बालः अधर्मिष्ठः ईहते नरकायुष्यम् ।।४।।

**हिंसे बाले मुसावाई, अद्धाणंमि विलोवए ।**
**अन्नदत्तहरे तेणे, माई कन्नु हरे सढो ।।५।।**

**इत्थी विसयगिद्धे अ, महारंभपरिग्गहे ।**
**भुंजमाणे सुरं मंसं, परिवूढे परं दमे ।।६।।**

**अयकक्करभोई अ, तुंदिल्ले चिअलोहिए ।**
**आउअं नरए कंखे, जहाएसं व एलए ।।७।।**

**।। त्रिभिर्विशेषकम् ।।**

हिंस्त्रः बालः मृषावादो, अध्वनि विलौपकः ।
अन्यादत्तहरस्तेनः, मायी कन्नुहरः शठः ।।५।।

स्त्री-विषयगृद्धश्च, महारम्मपरिग्रहः ।
भुञ्जानः सुरां मांसं, परिवृढः परं दमः ।।६।।

अजकर्करभोजी च, तुन्दिलो चित्तलोहितः ।
आयुष्कं नरके कांक्षति यथाऽऽदेशमिव एडकः ।।७।।

**।। त्रिभिर्विशेषकम् ।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**आसणं सयणं जाणं, वित्तं कामे अ भुंजिया ।**
**दुस्साहडं धणं हिच्चा, बहु संचिणिआ रयं ।।८।।**

**तओ कम्मगुरु जंतु, पच्चुप्पन्नपरायणे ।**
**अएव्व आगयाएसे, मरणंतंमि सोअई ।।९।। युग्मम् ।।**

आसनं शयनं यानं, वित्तं कामान् भुक्त्वा ।
दुःसंहृतं धनं त्यक्त्वा, बहु संचित्य रजः ।।८।।

ततः कर्मगुरुर्जन्तुः, प्रत्युत्पन्नपरायणः ।
अजवत् आगते आदेशे, मरणान्ते शोचति ।।९।। **युग्मम् ।।**

**तओ आउ परिक्खीणे, चुआ देहा विहिंसगा ।**
**आसुरिअं दिसं बाला, गच्छंति अवसा तमं ।।१०।।**

ततः आयुषि परिक्षीणे, च्युता देहात् विहिंसकाः ।
आसुरीं दिशं बालाः गच्छन्ति अवशास्तमाम् ।।१०।।

**जहा कागणिए हेउं, सहस्सं हारए नरो ।**
**अपत्थं अंबगं भुच्चा, राया रज्जं तु हारए ।।११।।**

यथा काकिण्या हेतोः सहस्त्रं हारयेत् नरः ।
अपथ्यं आम्रकं भुक्त्वा, राजा राज्यं तु हारयेत् ।।११।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**एवं माणुस्सगा कामा, देवकामाणमंतिए ।**
**सहस्सगुणिआ भुज्जो, आउ कामा य दिव्विआ ।।१२।।**

एवं मानुष्यकाः कामाः, देवकामानामन्तिके ।
सहस्त्रगुणिताः भूयः, आयुःकामाश्च दिव्यकाः ।।१२।।

**अणेगवासानउआ, जा सा पन्नवओ ठिई ।**
**जाणि जीअंति दुम्मेहा, ऊणे वाससयाउए ।।१३।।**

अनेकवर्षनयुतानि, या सा प्रज्ञावतः स्थितिः ।
यानि जीयन्ते दुर्मेधसः, ऊने वर्षशतायुषि ।।१३।।

**जहा य तिन्नि वण्णिआ, मूलं घित्तूण निग्गया ।**
**एगोत्थ लहई लाभं एगो मूलेण आगओ ।।१४।।**

**एगो मूलंपि हारित्ता, आगओ तत्थ वाणिओ ।**
**ववहारे उवमा एसा, एवं धम्मे विआणह ।।१५।।**

**।। युग्मम् ।।**

यथा च त्रयो वाणिजा, मूलं गृहीत्वा निर्गताः ।
एकोऽत्र लभते लाभं, एको मूलेनागतः ।।१४।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

एको मूलमपि हारयित्वा, आगतस्तत्र वाणिजः ।
व्यवहारे उपमा एषा, एवं धर्मे विजानीत ।।१५।।

।। युग्मम् ।।

**माणुसत्तं भवे मूलं, लाभो देवगई भवे ।**
**मूलच्छेएण जीवाणं, नरगतिरिक्खत्तणं धुवं ।।१६।।**

मानुषत्वं भवेत् मूलं, लाभो देवगतिर्भवेत् ।
मूलच्छेदेन जीवानां, नरकतिर्यक्त्वं ध्रुवम् ।।१६।।

**दुहओ गई बालस्स, आवई वहमूलिजा ।**
**देवत्तं माणुसत्तं च, जं जिए लोलया सढे ।।१७।।**

द्विधा गतिर्बालस्य, आपद् वधमूलिका ।
देवत्वं मानुषत्वं च, यज्जितो लोलता शठः ।।१७।।

**तओ जिए सइं होइ, दुविहं दुग्गइं गए ।**
**दुल्लहा तस्स उम्मग्गा, अद्धाए सुचिरादवि ।।१८।।**

ततो जितः सदा भवति, द्विविधां दुर्गतिं गतः ।
दुर्लभा तस्य उन्मज्जा, अद्धायां सुचिरादपि ।।१८।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**एवं जिअं सपेहाए, तुलिआ बालं च पंडिअं ।**
**मूलिअं ते पवेसंति, माणुसिं जोणिमिंति जे ।।१९।।**

एवं जितं संप्रेक्ष्य, तोलयित्वा बालं च पण्डितम् ।
मौलिकं ते प्रविशन्ति, मानुषीं योनिमायान्ति ये ।।१९।।

**वेमायाहिं सिक्खाहिं, जे नरा गिहिसुव्वया ।**
**उविंति माणुसं जोणिं, कम्मसच्चा हु पाणिणो ।।२०।।**

विमात्राभिः शिक्षाभिः, ये नरा गृहिसुव्रताः ।
उपयान्ति मानुषीं योनिं, कर्मसत्याः खलु प्राणिनः ।।२०।।

**जेसिं तु विउला सिक्खा, मूलिअं ते अइत्थिआ ।**
**सीलवंता सविसेसा, अदीणा जंति देवयं ।।२१।।**

येषां तु विपुला शिक्षा, मौलिकं ते अतिक्रम्य ।
शीलवन्तः सविशेषाः, अदीना यान्ति देवताम् ।।२१।।

**एवमदीणवं भिक्खुं, अगारिं च विआणिआ ।**
**कहं नु जिच्चमेलिक्खं, जिच्चमाणो न संविदे ।।२२।।**

एवमदैन्यवन्तं भिक्षुं अगारिणं च विज्ञाय ।
कथं नु जेयं ईदृक्षं, जीयमानो न संवित्ते ।।२२।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**जहा कुसग्गे उदगं, समुद्देण समं मिणे ।**
**एवं माणुस्संगा कामा, देवकामाण अंतिए ।।२३।।**

यथा कुशाग्रे उदकं, समुद्रेण समं मिनुयात् ।
एवं मानुष्यकाः कामाः, देवकामानामन्तिके ।।२३।।

**कुसग्गमित्ता इमे कामा, संनिरुद्धम्मि आउए ।**
**कस्स हेउं पुरा काउं, जोगक्खेमं न संविदे ।।२४।।**

कुशाग्रमात्रा इमे कामाः, सन्निरुद्धे आयुषि ।
कं हेतुं पुरस्कृत्य, योगक्षेमं न संवित्ते ।।२४।।

**इह कामानिअट्टस्स, अत्तट्ठे अवरज्झई ।**
**सोच्चा नेआउयं मग्गं, जं भुज्जो परिभस्सइ ।।२५।।**

इह कामानिवृत्तस्य, आत्मार्थः अपराध्यति ।
श्रुत्वा नैयायिकं मार्गं, यद् भूयः परिभ्रश्यति ।।२५।।

**इह कामनिअट्टस्स, अत्तट्ठे नावरज्झई ।**
**पूईदेहनिरोहेणं, भवे देवेत्ति मे सुअं ।।२६।।**

इह कामनिवृत्तस्य, आत्मार्थः नापराध्यति ।
पूतिदेहनिरोधेन, भवति देवः इति मे श्रुतम् ।।२६।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**इड्ढी जुई जसो वण्णो, आउं सुहमणुत्तरं ।**
**भुज्जो जत्थ मणुस्सेसु तत्थ से उववज्जई ।।२७।।**

ऋद्धिर्द्युतिर्यशोवर्णः, आयुः सुखमनुत्तरम् ।
भूयो यत्र मनुष्येषु, तत्र स उपपद्यते ।।२७।।

**बालस्स पस्स बालत्तं, अहम्मं पडिवज्जिआ ।**
**चिच्चा धम्मं अहम्मिट्ठे, नरएसु उववज्जई ।।२८।।**

बालस्य पश्य बालत्वं, अधर्मं प्रतिपद्य ।
त्यक्त्वा धर्मं अधर्मिष्ठः नरके उपपद्यते ।।२८।।

**धीरस्स पस्स धीरत्तं, सव्वधम्माणुवत्तिणो ।**
**चिच्चा अधम्मं धम्मिट्ठे, देवेसु उववज्जइ ।।२९।।**

धीरस्य पश्य धीरत्वं, सर्वधर्मानुवर्तिनः ।
त्यक्त्वा अधर्मं धर्मिष्ठः देवेषु उपपद्यते ।।२९।।

**तुलिआणं बालभावं, अबालं चेव पंडिए ।**
**चइऊण बालभावं, अबालं सेवए मुणि त्तिबेमि ।।३०।।**

तोलयित्वा बालभावं, अबालं चैव पण्डितः ।
त्यक्त्वा बालभावं, सेवंते मुनिरिति ब्रवीमि ।।३०।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

# श्री कापिलीयाध्ययन-८

**अधुवे असासयम्मि, संसारम्मि दुक्खपउराए ।**
**किं नाम होज्ज तं कम्मयं, जेणाहं दुग्गइं न गच्छेज्जा ।।१।**

अध्रुवे अशाश्वते, संसारे तु दुःखप्रचुरके ।
किं नाम भवेत् तत् कर्मकं, येनाहं दुर्गतिं न गच्छेयम् ।।१।

**विजहित्तु पुव्वसंजोगं, न सिणेहं कहिंचि कुव्विज्जा ।**
**असिणेह सिणेहक़रेहिं, दोसपओसेहिं मुच्चए भिक्खू ।।२।**

विहाय पूर्वसंयोगं,न स्नेहं क्वचित् कुर्वीत ।
अस्नेहः स्नेहकरेषु, दोषप्रदोषैर्मुच्यते भिक्षुः ।।२।।

**तो नाणदंसणसमग्गो, हिअनिस्सेअसाए सव्वजीवाणं ।**
**तेसिं विमोक्खणट्ठाए, भासइ मुणिवरो विगयमोहो ।।३।।**

ततः ज्ञानदर्शनसमग्रः हितनिः श्रेयसाय सर्वजीवानाम् ।
तेषां विमोक्षणार्थाय, भाषते मुनिवरो विगतमोहः ।।३।।

**सव्वं गंथं कलहं च, विप्पज्जहे तहाविहं भिक्खू ।**
**सव्वेसु कामजाएसु, पासमाणो न लिप्पइ ताई ।।४।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

सर्वं ग्रन्थं कलहं च, विप्रजह्यात् तथाविधं भिक्षुः ।
सर्वेषु कामजातेषु, पश्यन् न लिप्यते त्रायी ।।४।।

**भोगामिसदोसविसन्ने, हियनिस्सेअसुबुद्धिविवज्जत्थे ।**
**बाले य मंदिए मूढे, बज्झई मच्छिआ व खेलम्मि ।।५।।**

भोगामिषदोषविषण्णः हितनिः श्रेयसबुद्धिविपर्यस्तः ।
बालाश्च मन्दः मुढः, बध्यते मक्षिकेव खेले ।।५।।

**दुप्परिच्चया इमे कामा, नो सुजहा अधीरपुरिसेहिं ।**
**अह संति सुव्वया साहू, जे तिरंति अतरं वणिआ वा ।।६।।**

दुप्परित्यजा इमे कामाः नो सुहाना अधीरपुरुषैः ।
अछ सन्ति सुव्रताः साधवः ये तरन्ति अतरं वणिज इव ।।६।।

**समणा मु एगे वयमाणा, पाणवहं मिया अयाणंता ।,**
**मंदा निरयं गच्छंति, बाला पावियाहिं दिट्ठीहिं ।।७।।**

श्रमणाः स्मः एके वदन्तः प्राणवधं मृगा अजानन्तः ।
मन्दा निरयं गच्छन्ति, बालाः पापिकाभिर्दुष्टिमिः ।।७।।

**न हु पाणवहं अणुजाणे, मुच्चेज्ज कयाइ सव्वदुःखाणं ।**
**एवं आरिएहिं अक्खायं, जेहिं इमो साहुधम्मो पन्नत्तो ।।८।।**

नैव प्राणवधं अनुजानन् मुच्येत कदाचित् सर्वदुःखानाम् ।
एवमार्यैराख्यातं यैः, अयं आधुधर्मः प्रज्ञप्तः ।।८।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**पाणे अ नाइवाएज्जा, से समिए त्ति वुच्चई ताइ ।**
**तओ से पावयं कम्मं, निज्जाइ उदगं व थलाओ ।।९।।**

प्राणांश्च नातिपातयेत्, स समित इत्युच्य ते त्रायी ।
ततोऽथ पापकं कर्मः, निर्याति उदकमिव स्थलात् ।।९।।

**जगनिस्सिहिं भूएहिं, तसनामेहिं थावरेहिं च ।**
**नो तेसिमारभे दंड, मणसा वयसा कायसा चेव ।।१०।।**

जगन्निश्रितेषु भूतेषु, त्रसनामसु, स्थावरेषु च ।
ना तेषु आरभेत दंण्डं, मनसा वचसा कायेन चैव ।।१०।।

**सुद्धेसणाओ नच्चा णं, तत्थ ठविज्ज भिक्खू अप्पाणं ।**
**जायए घासमेसिज्जा, रसगिद्धे न सिया भिक्खाए ।।११।।**

शुद्धैषणाः ज्ञात्वा खलु, तत्र स्थापयेद् भिक्षुरात्मानम् ।
यात्रायै ग्रासमेषयेत्, रसगृद्धो न स्याद् भिक्षादः ।।११।।

**पंताणि चेव सेविज्जा, सीयपिंडं पुराणकुम्मासं ।**
**अदु बुक्कसं पुलागं वा, जवणट्ठाए निसेवए मंथुं ।।१२।।**

प्रान्तानि चैव सेवेत, शीतपिण्डं पुराणकुल्माषान् ।
अथवा बुक्कसं पुलाकं वा, यापनार्थं निषेवेत मन्थुम् ।।१२।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**जे लक्खणं च सुविणं च, अंगविज्जं च जे पउंजंति ।**
**न हु ते समणा वुच्चंति, एवं आयरिएहिं अक्खायं ।।१३।।**

ये लक्षणं च स्वप्नं च, अङ्गविद्यां य चे प्रयुञ्जते ।
न हु ते श्रमणा उच्यन्ते, एवमाचार्यैराख्यातम् ।।१३।।

**इह जीविअं अनिअमेत्ता, पब्भट्ठा समाहिजोएहिं ।**
**ते कामभोगरसगिद्धा, उव्वज्जंति आसुरे काए ।।१४।।**

इह जीवितमनियम्य, प्रभ्रष्टाः समाधियोगेभ्यः ।
ते कामभोगरसगृद्धाः उपपद्यन्ते आसुरे काये ।।१४।।

**तत्तोऽवि उव्वट्टित्ता, संसारं बहुं अणु परिअटंति ।**
**बहुकम्मलेवलित्ताणं, बोही होई सुदुल्लहो तेसिं ।।१५।।**

ततोऽपि उद्धृत्य, संसारं बहुं अनु पर्यटन्ति ।
बहुकर्मलेपलिप्तानां, बोधिर्भवति सुदुर्लभः तेषाम् ।।१५।।

**कसिणंपि जो इमं लोगं, पडिपुण्णं दलेज्ज इक्कस्स ।**
**तेणावि से न संतुस्से, इइ दुप्पूरए इमे आया ।।१६।।**

कृत्स्नमपि य इमं लोकं, परिपूणं दद्यात् एकस्मै ।
तेनापि स न संतुष्येत्, इति दुष्पूरकोऽयमात्मा ।।१६।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**जहा लाहो तहा लोहो, लाहा लाहो पवड्ढइ ।**
**दो मासकयं कज्जं, कीए वि न निट्ठिअं ।।१७।।**

यथा लोभो तथा लोभो, लाभाल्लोभः प्रवर्धते ।
द्विमाषकृतं कार्यं, कोट्यापि न निष्ठितम् ।।१७।।

**णो रक्खसीसु गिज्झिज्जा, गंडवच्छासुऽणेगचित्तासु ।**
**जाओ पुरिसं पलोभित्ता, खेल्लंति जहा वा दासेहिं ।।१८।।**

नो राक्षसीषु गृध्येत, गण्डवक्षःसु अनेकचित्तासु ।
याः पुरुषं प्रलोभ्य, क्रीडन्ति यथा वा दासैः ।।१८।।

**नारीसु नो पगिज्झिज्जा, इत्थी विप्पजहे अणगारे ।**
**धम्मं च पेसलं नच्चा, तत्थ ठविज्ज भिक्खू अप्पाणं ।।१९।।**

नारीषु नो प्रगृध्येत्, स्त्रियः विप्रजह्यात् अनगारः ।
धर्मं च पेशलं ज्ञात्वा, तत्र स्थापयेद् भिक्षुरात्मानम् ।।१९।।

**इति एस धम्मे अक्खाए, कविलेणं च विसुद्धपन्नेणं ।**
**तरिहिंति जे काहिंति, तेहिं आराहिअ दुवे लोग त्तिबेमि ।।२०।।**

इति एष धर्म आख्यातः कपिलेन च विशुद्धप्रज्ञेन ।
तारिष्यन्ति ये करिष्यन्ति, तैराराधितौ द्वौ लोकौ इति ब्रवीमि ।।२०।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

# श्री नमिप्रव्रज्याध्ययन-९

**चइऊण देवलोगाओ, उववण्णो माणुसंमि लोगम्मि ।**
**उवसंतमोहणिज्जो, सरइ पोरणिअं जाइं ।।१।।**

च्युत्वा देवलोकात्, उपपन्नो मानुषे लोके ।
उपशान्तमोहनीयः स्मरति पौराणिकीं जातिम् ।।१।।

**जाइं सरित्तु भयवं, सहसंबुद्धो अणुत्तरे धम्मे ।**
**पुत्तं ठवित्तु रज्जे, अभिणिक्खमई नमी राया ।।२।।**

जातिं स्मृत्वा भगवान्, स्वयंसंबुद्धोऽनुत्तरे धर्मे ।
पुत्रं स्थापयित्वा राज्ये, अभिनिष्क्रामति नमि राजा ।।२।।

**सो देवलोगसरिसे, अंतेउरवरगओ वरे भोए ।**
**भुंजित्तु नमि राया, बुद्धो भोगे परिच्चयई ।।३।।**

स दैवलोकसदृशान्, अन्तः पुरवरगतौ वरान् भोगान् ।
भुक्त्वा नमी राजा, बुद्धो भोगान् परित्यजति ।।३।।

**मिहिलं सपुरजणवयं, बलमोरोहं च परिअणं सव्वं ।**
**चिच्चा अभिनिक्खंत्तो, एगंतमहिट्ठिओ भयवं ।।४।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

मिथिलां सपुरजनपदां, बलमवरोधं च परिजनं सर्वम् ।
त्यक्त्वा अभिनिष्क्रान्तः, एकान्तमधिष्ठितो भगवान् ।।४।।

**कोलाहलगसंभूयं, आसी मिहिलाइ पव्वयंतम्मि ।**
**तइआ रायरिसिम्मि, नमिम्मि अभिणिक्खमंतम्मि ।।५।।**

कोलहलकसम्भूतं, आसीत् मिथिलायां प्रव्रजति ।
तदा राजर्षौ नमौ, अभिनिष्क्रामति ।।५।।

**अब्भुट्ठियं रायरिसिं, पव्वज्जाठाणमुत्तमं ।**
**सक्को माहणरूवेण, इमं वयणमब्बवी ।।६।।**

अभ्युत्थितं राजर्षि, प्रव्रज्यास्थानमुत्तमम् ।
शक्रो ब्राह्मणरूपेण, इदं वचनमब्रवीत् ।।६।।

**किं नु भो अज्ज मिहिलाए, कोलोहलगसंकुला ।**
**सुव्वंति दारुणा सद्दा, पासाएसु गिहेसु अ ।।७।।**

किं नु भोः ! अद्य मिथिलायां, कोलाहलकसंकुला ।
श्रूयन्ते दारुणाः शब्दाः प्रासादेषु गृहेषु च ।।७।।

**एअमट्ठं निसामित्ता, हेउकारणचोइओ ।**
**तओ नमी रायरिसी, देविंदं इणमब्बवी ।।८।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

एतमर्थं निशम्य, हेतुकारणनोदित ।
ततो नमी राजर्षिः, देवेन्द्रमिदमब्रवीत् ।।८।।

**मिहिलाए चेइए वच्छे, सीयच्छाए मणोरमे ।**
**पत्तपुप्फफलोवेए, बहूणं बहुगुणे सया ।।९।।**

मिथिलायां चैत्यः वृक्षः शीतच्छायः मनोरमः ।
पत्रपुष्पफलोपेतेः, बहूनां बहुगुणः सदा ।।९।।

**वाएण हीरमाणम्मि, चेइअम्मि मणोरमे ।**
**दुहिआ असरणा अत्ता, एए कंदंति भो ! खगा ।।१०।।**

वातेन हीयमाणे, चैत्य मनोरमे ।
दुःखिता आशरणा आर्त्ता, एते क्रन्दन्ति भोः ! खगाः ।।१०।।

**एअमट्ठं निसामित्ता, देउकारणचोइओ ।**
**तओ नमिं रायरिसिं, देविंदो इणमब्बवी ।।११।।**

एतमर्थं निशम्य, हेतुकारणनोदितः ।
ततो नमिं राजर्षि, देवेन्द्र इदमब्रवीत् ।।११।।

**एस अग्गी अ वाऊ, एअं डज्झइ मंदिरं ।**
**भयवं ! अंतेउरं तेणं, किस णं नावपेक्खह ।।१२।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

एष अग्निश्च वायुश्च, एतद् दह्यते मन्दिरम् ।
भगवन् ! अन्तःपुरं तेन, कस्मात् खलु नावप्रेक्षसे ।।१२।।

**एअमट्ठं निसामित्ता, हेउकारणचोइओ ।**
**तओ नमी रायरिसी, देविंदं इणमब्बवी ।।१३।।**

एतमर्थं निशम्य, हेतुकारणनोदितः ।
ततो नमी राजर्षिः, देवेन्द्रं इदमब्रवीत् ।।१३।।

**सुहं वसामो जीवामो, जेसिं मो नत्थि किंचणं ।**
**मिहिलाए डज्झमाणीए, न मे डज्झइ किंचणं ।।१४।।**

सुखं वसामो जीवामः येषां मे नास्ति किंचन ।
मिथिलायां दह्यमानायां, न मे दहति किंचन ।।१४।।

**चत्तपुत्तकलत्तस्स, निवावारस्स भिक्खुणो ।**
**पिअं ण विज्जइ किंचि, अप्पिअं पि ण विज्जई ।।१५।।**

त्यक्तपुत्रकलत्रस्य, निर्व्यापारस्य भिक्षोः ।
प्रियं न विद्यते किंचित्, अप्रियमपि न विद्यते ।।१५।।

**बहुं खु मुणिणो भद्दं, अणगारस्स भिक्षोः ।**
**सव्वओ विप्पमुक्कस्स, एगंतमणुपस्सओ ।।१६।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

बहु खलु मुनेर्भद्रं, अनगारस्य भिक्षोः ।
सर्वतो विप्रमुक्तस्य, एकान्तमनुपश्यतः ।।१६।।

**एअमट्ठं निसामित्ता, हेउकारणचोइओ ।**
**तओ नमिं रायरिसिं, देविंदो इणमब्बवी ।।१७।।**

एतमर्थं निशम्य हेतुकारणनोदितः ।
ततो नमिं राजर्षिं, देवेन्द्र इदमब्रवीत् ।।१७।।

**पागारं कारइत्ता णं, गोपुरट्टालगाणि अ ।**
**ओसूलगसयग्घीओ, तओ गच्छसि खत्तिया ।।१८।।**

प्राकारं कारयित्वा खलु, गोपुराट्टालकानि च ।
ओसूलकं शतघ्नीश्च, ततो गच्छ क्षत्रिय ! ।।१८।।

**एअमट्ठं निसामित्ता, हेउकारणचोइओ ।**
**तओ नमी रायरिसी, देविंदं इणमब्बवी ।।१९।।**

एतमर्थं निशम्य, हेतुकारणनोदितः ।
ततो नमी राजर्षिः, देवेन्द्रमिदमब्रवीत् ।।१९।।

**सद्धं च नगरं किच्चा, तव संवरमग्गलं ।**
**खंतिनिऊणपागारं, तिगुत्तं दुप्पधंसगं ।।२०।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**धणुं परक्कमं किच्चा, जीवं च ईरिअं सया ।**
**धिइं च केअणं किच्चा, सच्चेणं पलिमंथए ।।२१।।**

**।। युग्मम् ।।**

श्रद्धां च नगरं कृत्वा, तपः संवरमर्गलाम् ।
क्षान्तिनिपुणप्राकारं, त्रिगुप्तं दुष्प्रधर्षकम् ।।२०।।

धनुः पराक्रमं कृत्वा, जीवां च ईर्यां सदा ।
धृतिं च केतनं कृत्वा, सत्येन परिबध्नीयात् ।।२१।।

।। युग्मम् ।।

**तवनारायजुत्तेणं, भित्तूणं कम्मकंचुअं ।**
**मुणी विगयसंगामो, भवाओ परिमुच्चई ।।२२।।**

तपोनाराचयुक्तेन, भित्वा कर्मकञ्चुकम् ।
मुनिर्विगतसंग्रामो, भवात् परिमुच्यते ।।२२।।

**एअमट्ठं निसामित्ता, हेउकारणचोइओ ।**
**तओ नमीं रायरिसीं, देविंदो इणमब्बवी ।।२३।।**

एतमर्थं निशम्य, हेतुकारणनोदितः ।
ततो नमिं राजर्षिं, देवेन्द्र इदमब्रवीत् ।।२३।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**पासाए कारइत्ता णं, वद्धमाणगिहाणिअ ।**
**वालग्गपोइआओ अ, तओ गच्छसि खत्तिआ ! ।।२४।।**

प्रासादान् कारयित्वा खलु, वर्धमानगृहाणि च ।
बालाग्रपोतिकाश्च, ततो गच्छ क्षत्रिय ! ।।२४।।

**एअमट्ठं निसामित्ता, हेउकारणचोइओ ।**
**तओ नमी रायरिसी, देविंदं इणमब्बवी ।।२५।।**

एतमर्थं निशम्य, हेतुकारणनोदितः ।
ततो नमी राजर्षिः, देवेन्द्रं इदमब्रवीत् ।।२५।।

**संसयं खलु सो कुणइ, जो मग्गे कुणई घरं ।**
**जत्थेव गंतुमिच्छिज्जा, तत्थ कुव्विज्ज सासयं ।।२६।।**

संशयं खलु स कुरुते, यो मार्गे कुरुते गृहम् ।
यत्रैव गन्तुमिच्छेत्, तत्र कुर्वीत स्वाश्रयम् ।।२६।।

**एअमट्ठं निसामित्ता, हेउकारणचोइओ ।**
**तओ नमिं रायरिसीं, देविंदो इणमब्बवी ।।२७।।**

एतमर्थं निशम्य, हेतुकारणनोदितः ।
ततो नमिं राजर्षिं, देवेन्द्र इदमब्रवीत् ।।२७।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**आमोसे लोमहारे अ, गंठिभेए च तक्करे ।**
**नगरस्स खेमं काऊणं, तओ गच्छसि खत्तिया ।।२८।।**

आमोषान् लोमहारांश्च, ग्रन्थिभेदांश्च तस्करान् ।
नगरस्य क्षेमं कृत्वा, ततो गच्छ क्षत्रिय ! ।।२८।।

**एअमट्ठं निसामित्ता, हेउकारणचोइओ ।**
**तओ नमीं रायरिसी, देविंदं इणमब्बवी ।।२९।।**

एतमर्थं निशम्य, हेतुकारणनोदितः ।
ततो नमी राजर्षिः, देवेन्द्रं इदमब्रवीत् ।।२९।।

**असईं तु मणुस्सेहिं, मिच्छादंडो पजुज्जए ।**
**अकारिणोत्थ वज्झंति, मुच्चई कारगो जणो ।।३०।।**

असकृत् तु मनुष्यैः, मिथ्यादण्डः प्रयुज्यते ।
अकारिणोऽत्र बध्यन्ते, मुच्यते कारको जनः ।।३०।।

**एअमट्ठं निसामित्ता, हेउकारणचोइओ ।**
**तओ नमिं रायरिसीं, देविंदो इणमब्बवी ।।३१।।**

एतमर्थं निशम्य, हेतुकारणनोदितः ।
ततो नमिं राजर्षिं, देवेन्द्र इदमब्रवीत् ।।३१।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**जे केइ पत्थिवा तुब्भं, न नमंति नराहिवा ।**
**वसे ते ठावइत्ता णं, तओ गच्छसि खत्तिआ ! ।।३२।।**

ये केचित् पार्थिवास्तुभ्यं, न नमन्ति नराधिप ! ।
वशे तान् स्थापयित्वा खलु, ततो गच्छ क्षत्रिय ! ।।३२।।

**एअमट्ठं निसामित्ता, हेउकारणचोइओ ।**
**तओ नमी रायरिसी, देविंदं इणमब्बवी ।।३३।।**

एतमर्थं निशम्य, हेतुकारणनोदितः ।
ततो नमी राजर्षिः, देवेन्द्रं इदमब्रवीत् ।।३३।।

**जो सहस्सं सहस्साणं, संगामे दुज्जए जिणे ।**
**एगं जिणिज्ज अप्पाणं, एस से परमो जओ ।।३४।।**

ये सहस्रं सहस्राणां संग्रामे दुर्जयं जयेत् ।
एकं जयेदात्मानं, एष तस्य परमो जयः ।।३४।।

**अप्पणामेव जुज्झाहि, कि ते जुज्झेण बज्झओ ।**
**अप्पणामेवमप्पाणं, जइत्ता सुहमेहए ।।३५।।**

आत्मनैव युध्यस्व, किं ते युद्धेन बाह्यतः ।
आत्मनैव आत्मानं, जित्वा सुखमेधते ।।३५।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**पंचिंदिआणि कोहं, माणं मायं तहेव लोभं च ।**
**दुज्जयं चेव अप्पणं, सव्वमप्पे जिए जियं ।।३६।।**

पञ्चेन्द्रियाणि क्रोधः, मानो माया तथैव लोभश्च ।
दुर्जयं श्चैव आत्मा, सर्वमात्मनि जिते जितम् ।।३६।।

**एअमट्ठं निसामित्ता, हेउकारणचोइओ ।**
**तओ नमिं रायरिसिं, देविंदो इणमब्बवी ।।३७।।**

एतमर्थं निशम्य, हेतुकारणनोदितः ।
ततो नमिं राजर्षिं, देवेन्द्रः इदमब्रवीत् ।।३७।।

**जइत्ता विउले जन्ने, भोइत्ता समणमाहणे ।**
**दच्चा भुच्चा य जिट्ठा य, तओ गच्छसि खत्तिया ।।३८।**

याजयित्वा विपुलान् यज्ञान्, भोजयित्वा श्रमणब्राह्मणान् ।
दत्त्वा भुक्त्वा च दष्ट्वा च, ततो गच्छ क्षत्रिय ! ।।३८।।

**एअमट्ठं निसामित्ता, हेउकारणचोइओ ।**
**तओ नमी रायरिसी, देविंदं इणमब्बवी ।।३९।।**

एतमर्थं निशम्य, हेतुकारणनोदितः ।
ततो नमी राजर्षिः, देवेन्द्रं इदमब्रवीत् ।।३९।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**जो सहस्सं सहस्साणं, मासे मासे गवं दए ।**
**तस्यावि संजमो सेओ, अदिंतस्स वि किंचणं ।।४०।।**

यः सहस्रं सहस्राणां, मासे मासे गवां दद्यात् ।
तस्सापि संयमः श्रेयान्, अददतोऽपि किंचन ।।४०।।

**एअमट्ठं निसामित्ता, हेउकारणचोइओ ।**
**तओ नमिं रायरिसिं, देविंदो इणमब्बवी ।।४१।।**

एतमर्थं निशम्य, हेतुकारणनोदितः ।
ततो नमिं राजर्षिः, देवेन्द्रः इदमब्रवीत् ।।४१।।

**घोरासमं चइंत्ताणं, अन्नं पत्थेसि आसमं ।**
**इहेव पोसहरओ, भवाहि मणुवाहिवा ! ।।४२।।**

घोराश्रमं त्यक्त्वा खलु, अन्यं प्रार्थयसि आश्रमम् ।
इहैव पौषधरतः भव मनुजाधिप ! ।।४२।।

**एअमट्ठं निसामित्ता, हेउकारणचोइओ ।**
**तओ नमी रायरिसी, देविंदं इणमब्बवी ।।४३।।**

एतमर्थं निशम्य, हेतुकारणनोदितः ।
ततो नमि राजर्षिः, देवेन्द्रं इदमब्रवीत् ।।४३।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**मासे मासे उ जो बोलो कुसग्गेणं तु भुंजए ।**
**न सो सुअक्खायधम्मस्स, कलं अग्घइ सोलसिं ।।४४**

मासे मासे तु यो बालः, कुशाग्रेण तु भुङ्क्ते ।
न स स्वाख्यातधर्मस्य, कलामर्हति षोडशीम् ।।४४।।

**एअमट्ठं निसामित्ता, हेउकारणचोइओ ।**
**तओ नमिं रायरिसिं; देविंदो इणमब्बवी ।।४५।।**

एतमर्थं निशम्य, हेतुकारणनोदितः ।
ततो नमिं राजर्षिः, देवेन्द्रः इदमब्रवीत् ।।४५।।

**हिरण्णं सुवण्णं मणिमोत्तं, कंसं दूसं च वाहणं ।**
**कोसं च वड्ढावइत्ताणं, तओ गच्छसि खत्तिआ ! ।।४६**

हिरण्यं सुवर्णं मणुमुक्तं, कांस्यं दुष्यं च वाहनम् ।
कोषं च वर्धयित्वा खलु, ततो गच्छ क्षत्रिय ! ।।४६।।

**एअमट्ठं निसामित्ता, हेउकारणचोइओ ।**
**तओ नमि रायरिसी, देविंदं इणमब्बवी ।।४७।।**

एतमर्थं निशम्य, हेतुकारणनोदितः ।
ततो नमि राजर्षिः, देवेन्द्रं इदमब्रवीत् ।।४७।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**सुवण्णरुप्पस्स उ पव्वया भवे,**

**सिआ हु केलाससमा असंखया ।**

**नरस्य लुद्धस्स न तेहि किंचि,**

**इच्छा हु आगाससमा अणंतिआ ।।४८।।**

सुवर्णरुप्यस्य तु पर्वता भवेयुः, स्यात् हु कैलाससमा असंख्यकाः ।

नरस्य लुब्धस्य न तैः किंचित्, इच्छा हु आकाशसमा अनन्तिका ।।४८।।

**पुढवी साली जवा चेव, हिरण्णं पसुभिस्सह ।**

**पडिपुण्णं नालमेगस्स, इइ विज्जा तवं चरे ।।४९।।**

पृथ्वी शालयः यवाश्चैव, हिरण्यं पशुभिः सह ।

प्रतिपूर्ण नालमेकस्य, इति विदित्वा तपश्चरेत् ।।४९।।

**एअमट्ठं निसामित्ता, हेउकारणचोइओ ।**

**तओ नमिं रायरिसिं, देविंदो इंणमब्बवी ।।५०।।**

एतमर्थं निशम्य, हेतुकारणनोदितः ।

ततो नमिं राजर्षिः, देवेन्द्रः इदमब्रवीत् ।।५०।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अच्छेरगमब्भुदए, भोए चयसि पत्थिवा ।**
**असंते कामे पत्थेसि, संकप्पेण विहम्मसि ! ।।५१।।**

आश्चर्यमद्भुतकान्, भोगान् त्यजसि पार्थिव ! ।
असतः कामान् प्रार्थयसि, संकल्पेन विहन्यसे ।।५१।।

**एअमट्ठं निसामित्ता, हेउकारणचोइओ ।**
**तओ नमी रायरिसी, देविंदं इणमब्बवी ।।५२।।**

एतमर्थं निशम्य, हेतुकारणनोदितः ।
ततो नमी राजर्षिः, देवेन्द्रं इदमब्रवीत् ।।५२।।

**सल्लं कामा, विसं कामा, कामा आसाविसोवमा ।**
**कामे पत्थयमाणा य, अकामा जंति दुग्गइं ।।५३।।**

शल्यं कामा विषं कामाः कामा आशीविषोपमाः ।
कामान् प्रार्थयमानाश्च, अकामा यान्ति दुर्गतिम् ।।५३।।

**अहे वयइ कोहेणं, माणेणं अहमा गई ।**
**माया गइ पडिग्घाओ, लोहाओ दुहओ भयं ।।५४।।**

अधो व्रजति क्रोधेन, मानेन अधमा गतिः ।
मायया गतिप्रतिघातो, लोभादुभयतो भयम् ।।५४।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अवउज्झिऊण माहणरूवं, विउव्विऊणं इंदत्तं ।**
**वंदइ अभित्थुणंतो, इमाहिं महुराहिं वग्गूहिं ।।५५।।**

अपोह्य ब्राह्मणरूपं, विकृत्य इन्द्रत्वम् ।
वन्दते अभिष्टुवन्, इमाभिर्मधुराभिः वाग्भिः ।।५५।।

**अहो ते निज्जिओ कोहो, अहो माणो पराजिओ ।**
**अहो ते निरक्किया माया, अहो ! लोहो वसीकओ ।।५६।।**

अहो ! त्वया निर्जितः क्रोधः अहो मानः पराजितः ।
अहो ते निराकृता माया, अहो लोभो वशीकृतः ।।५६।।

**अहो ! तव ते अज्जवं साहु, अहो ते साहु मद्दवं ।**
**अहो ते उत्तमा खंती, अहो ते मुत्ति उत्तमा ।।५७।।**

अहो ! तव आर्जवं साधु, अहो ! ते साधु मार्दवम्।
अहो ! ते उत्तमा क्षान्तिः अहो ! ते मुक्तिरुत्तमा ।।५७।।

**इहंऽसि उत्तमो भंते !, पेच्चा होहिसि उत्तमो ।**
**लोगुत्तमुत्तमं ठाणं, सिद्धिं गच्छसि नीरओ ।।५८।।**

इह असि उत्तमो भदन्त ! पश्चात् भविष्यसि उत्तमः ।
लोकोत्तमोत्तमं स्थानं, सिद्धिं गच्छसि नीरजाः ।।५८।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**एवं अभित्थुणंतो, रायरिसिं उत्तमाइ सद्धाए ।**
**पयाहिणं कुणंतो, पुणो पुणो वंदए सक्को ।।५९।।**

एवमभिष्टुवन् राजर्षि उत्तमया श्रद्धया ।
प्रदक्षिणां कुर्वन्, पुनः पुनर्वन्दते शक्रः ।।५९।।

**तो वंदिऊण पाए, चक्कं-कुस लक्खणे मुणिवरस्स ।**
**आगासेणुप्पइओ, ललिअचवलकुंडलकिरीडी ।।६०।।**

ततो वन्दित्वा पदौ, चक्राङ्कुशलक्षणौ मुनिवरस्य ।
आक्राशेनोत्पतितः, ललितचपलकुण्डलकिरीटी ।।६०।।

**नमी नमेइ अप्पाणं, सक्खं सक्केण चोइओ ।**
**चइऊण गेहं वइदेही, सामन्ने पज्जुवट्ठिओ ।।६१।।**

नमिर्नमयति आत्मानं, साक्षात् शक्रेण नोदितः ।
त्यक्त्वा गेहं विदेही, श्रामण्ये पर्युपस्थितः ।।६१।।

**एवं करिंति संबुद्धा, पंडिआ पविअक्खणा ।**
**विणिअट्टंति भोगेसु, जहा से नमी रायरिसी त्तिबेमि ।।६२।।**

एवं कुर्वन्ति संबुद्धाः, पण्डिताः प्रविचक्षणाः ।
विनिवर्तन्ते भोगेभ्यः, यथा स नमी राजर्षिः इति ब्रवीमि ।।६२।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

# श्री द्रुमपत्रकाध्ययन-१०

**दुमपत्तए पंडुरए जहा, निवडइ राइगणाणं अच्चए ।**
**एवं मणुयाण जीविअं, समयं गोयम ! मा पमायए ।।१।।**

द्रुमपत्रकं पाण्डुरकं यथा, निपतति रात्रिगणानामत्यये ।
एवं मनुजानां जीवितं, समयं गौतम ! मा प्रमादयेः ।।१।।

**कुसग्गे जह ओसबिंदुए, थोवं चिट्ठइ लंबमाणए ।**
**एवं मणुआण जीवियं, समयं गोयम ! मा पमायए ।।२।।**

कुशाग्रे यथा अवश्यायबिन्दुकः, स्तोकं तिष्ठति लम्बमानकः ।
एवं मनुजानां जीवितं, समयं गौतम ! मा प्रमादयेः ।।२।।

**इइ इत्तरिअम्मि आउए, जीविअए बहुपच्चवायए ।**
**विहुणाहि रयं पुरेकडं, समयं गोयम ! मा पमायए ।।३।।**

इति इत्वरे आयुषि, जीवितके बहुप्रत्यपायके ।
विधुनीहि रजः पराकृतं, समयं गौतम ! मा प्रमादयेः ।।३।।

**दुल्लहे खलु माणुसे भवे, चिरकलेण वि सव्वपाणिणं ।**
**गाढा य विवाग कम्मुणो, समयं गोयम ! मा पमायए ।।४।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

दुर्लभः खलु मानुषो भवः, चिरकालेनापि सर्वप्राणिनाम् ।
गाढाश्च विपाकाः कर्मणां, समयं गौतम ! मा प्रमादयेः ।।४।।

**पुढवीक्कायमइगओ, उक्कोसं जीवो उ संवसे ।**
**कालं संखाईअं, समयं गोयम ! मा पमायए ।।५।।**

**आउक्कायमइगओ, उक्कोसं जीवो उ संवसे ।**
**कालं संखाईयं, समयं गोयम ! मा पमायए ।।६।।**

**तेउक्कायमइगओ, उक्कोसं जीवो उ संवसे ।**
**कालं संखाईअं, समयं गोयम ! मा पमायए ।।७।।**

**वाउक्कायमइगओ, उक्कोसं जीवो उ संवसे।**
**कालं संखाईअं, समयं गोयम ! मा पमायए ।।८।।**

**।। चतुर्भिः कलापकम् ।।**

पृथिवीकायमतिगतः, उत्कर्षतो जीवस्तु संवसेत् ।
कालं संख्यातीतं, समयं गौतम ! मा प्रमादयेः ।।५।।

अप्कायमतिगतः, उत्कर्षतो जीवस्तु संवसेत् ।
कालं संख्यातीतं, समयं गौतम ! मा प्रमादयेः ।।६।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

तेजस्कायमतिगतः, उत्कर्षतो र्ज वस्तु संवसेत् ।
कालं संख्यातीतं, समयं गौतम ! मा प्रमादयेः ।।७।।

वायुकायमतिगतः, उत्कर्षतो जीवस्तु संवसेत् ।
कालं संख्यातीतं, समयं गौतम ! मा प्रमादयेः ।।८।।

।। चतुर्भिः कलापकम् ।।

**वणस्सइकायमइगओ, उक्कोसं जीवोउ संवे से ।**
**कालमणंतं दुरंतं, समयं गोयम ! मा प्रमायए ।।९।।**

वनस्पतिकायमतिगतः, उत्कर्षतो जीवस्तु संवसेत् ।
कालमनन्तं दुरन्तं, समयं गौतम ! मा प्रमादयेः ।।९।।

**बेइंदियकायमइगओ, उक्कोसं जीवो उ संवसे ।**
**कालं संखिज्जसन्नियं, समयं गोयम ! मा पमायए ।।१०।।**

**तेइंदियकायमइगओ, उक्कोसं जीवो उ संवसे ।**
**कालं संखिज्जसन्नियं, समयं गोयम ! मा पमायए ।।११।।**

**चउरिंदियकायमइगओ, उक्कोसं जीवो उ संवसे ।**
**कालं संखिज्जसन्नियं, समयं गोयम ! मा पमायए ।।१२।।**

।। त्रिभिर्विशेषकम् ।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

द्विन्द्रियकायमतिगतः, उत्कर्षतो जीवस्तु संवसेत् ।
कालं संख्येयसंज्ञितं, समयं गौतम ! मा प्रमादयेः ।।१०।।

त्रीन्द्रियकायमतिगतः, उत्कर्षतो जीवस्तु संवसेत् ।
कालं संख्येयसंज्ञितं, समयं गौतम ! मा प्रमादयेः ।।११।।

चतुरिन्द्रियकायमतिगतः, उत्कर्षतो जीवस्तु संवसेत् ।
कालं संख्येयसंज्ञितं, समयं गौतम ! मा प्रमादयेः ।।१२।।

।। त्रिभिर्विशेषकम् ।।

**पंचिदियकायमइगओ, उक्कोसं जीवो उ संवसे ।**
**सत्तट्ठभवग्गहणे, समयं गोयम ! मा पमायए ।।१३।।**

पञ्चेन्द्रियकायमतिगतः, उत्कर्षतो जीवस्तु संवसेत् ।
सप्ताष्टभवग्रहणानि, समयं गौतम ! मा प्रमादयेः ।।१३।।

**देवे नेरइए अइगओ, उक्कोसं जीवो उ संवसे ।**
**इक्किक्क भवग्गइणे, समयं गोयम ! मा पमायए ।।१४।।**

देवान् नैरयिकानतिगतः, उत्कर्षतो जीवस्तु संवसेत् ।
एकैकभवग्रहणं, समयं गौतम ! मा प्रमादयेः ।।१४।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**एवं भवसंसारे, संसरइ सुहासुहेहिं कम्मेहिं ।**
**जीवो पमायबहुलो, समयं गोयम ! मा पमायए ।।१५।।**

एवं भवसंसारे, संसरन्ति शुभाशुभैः कर्मभिः ।
जीवः प्रमादबहुलः, समयं गौतम ! मा प्रमादयेः ।।१५।।

**लद्धूणवि माणुसत्तणं, आरिअत्तं पुणरवि दुल्लहं ।**
**बहवे दस्सुआ मिलेक्खुआ, समयं गोयम ! मा पमायए ।।१६।।**

लब्ध्वाऽपि मानुषत्वं, आर्यत्वं पुनरपि दुर्लभम् ।
बहवो दस्यवः म्लेच्छाः, समयं गौतम ! मा प्रमादयेः ।।१६।।

**लध्धूणवि आरिअत्तणं, अहीणपंचिंदिअया हु दुल्लहा ।**
**विगलिंदिअया हु दीसई, समयं गोयम ! मा पमायए ।।१७।।**

लब्ध्वाऽपि आर्यत्वं, अहीनपञ्चेन्द्रियता हु दुर्लभा ।
विकलेन्द्रियता हु दृश्यते, समयं गौतम ! मा प्रमादयेः ।।१७।।

**अहीणपंचिंदिअत्तं पि से लहे, उत्तमधम्मसुई उ दुल्लहा ।**
**कुतित्थिनिसेवए जणे, समयं गोयम ! मा पमायए ।।१८।।**

अहीनपञ्चेन्द्रियतामपि स लभेत, उत्तमधर्म श्रुतिस्तुः दुर्लभा ।
कुतीर्थिनिषेवको जनः, समयं गौतम ! मा प्रमादयेः ।।१८।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**लध्धूणवि उत्तमं सुईं, सद्दहणा पुणरपि दुल्लहा ।**
**मिच्छत्तनिसेवए जणे, समयं गोयम ! मा पमायए ।।१९।।**

लब्ध्वाऽपि उत्तमां श्रुतिं, श्रद्धा पुनरपि दुर्लभा ।
मिथ्यात्वनिषेवको जनः, समयं गौतम ! मा प्रमादयेः ।।१९।।

**धम्मंपि हु सद्दहंतया, दुल्लहया काएण फासया ।**
**इह कामगुणेसु मुच्छिआ, समयं गोयम ! मा पमायए ।।२०।।**

धर्ममपि हु श्रद्दधतोऽपि, दुर्लभकाः कायेन स्पर्शकाः ।
इह कामगुणेषु मूर्च्छिताः, समयं गौतम ! मा प्रमादयेः ।।२०।।

**परिजूरइ ते सरीरयं, केसा पांडुरया हवंति ते ।**
**से सोअबले अ हायई, समयं गोयम ! मा पमायए ।।२१।।**

परिजूरइ ते सरीरयं, केसा पांडुरया हवंति ते ।
से चक्खुबले अ हायई, समयं गोयम ! मा पमायए ।।२२।।

**परिजूरइ ते सरीरयं, केसा पांडुरया हवंति ते ।**
**से घाणबले अ हायई, समयं गोयम ! मा पमायए ।।२३।।**

परिजूरइ ते सरीरयं, केसा पांडुरया हवंति ते ।
से जिब्भबले अ हायई, समयं गोयम ! मा पमायए ।।२४।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**परिजूरइ ते सरीरयं, केसा पांडुरया हवंति ते ।**
**से फासबले अ हायई, समयं गोयम ! मा पमायए ।।२५।।**

परिजूरइ ते सरीरयं, केसा पांडुरया हवंति ते ।
से सव्वबले अ हायई, समयं गोयम ! मा पमायए ।।२६।।

।। षड्भिःकुलकम् ।।

**परिजीर्यति ते शरीरकं, केशाः पाण्डुरका भवन्ति ते ।**
**तत् श्रोत्रबलं च हीयते, समयं गौतम ! मा प्रमादयेः ।।२१।।**

परिजीर्यति ते शरीरकं, केशाः पाण्डुरका भवन्ति ते ।
तत् चक्षुर्बलं च हीयते, समयं गौतम ! मा प्रमादयेः ।।२२।।

**परिजीर्यति ते शरीरकं, केशाः पाण्डुरका भवन्ति ते ।**
**तत् घ्राणबलं च हीयते, समयं गौतम ! मा प्रमादयेः ।।२३।।**

परिजीर्यति ते शरीरकं, केशाः पाण्डुरका भवन्ति ते ।
तत् जिह्वाबलं च हीयते, समयं गौतम ! मा प्रमादयेः ।।२४।।

**परिजीर्यति ते शरीरकं, केशाः पाण्डुरका भवन्ति ते ।**
**तत् स्पर्शबलं च हीयते, समयं गौतम ! मा प्रमादयेः ।।२५।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

परिजीर्यति ते शरीरकं, केशाः पाण्डुरका भवन्ति ते ।
तत् सर्वबलं च हीयते, समयं गौतम ! मा प्रमादयेः ।।२६।।

।। षड्भिःकुलकम् ।।

**अरईगंडं विसूईआ, आयंका विविहा फूसंति ते ।**
**विहडइ विद्धंसइ ते सरीरयं, समयं गोयम ! मा पमायए ।।२७।।**

अरतिर्गण्डं विसूचिका, आतङ्काः विविधाः स्पृशन्ति ते ।
विघटते विध्वंस्यति ते शरीरकं, समयं गौतम ! मा प्रमादयेः ।।२७।।

**वोच्छिंद सिणेहमप्पणो, कुमुअं सारइअं वा पाणियं ।**
**से सव्वसिणेहवज्जिए, समयं गोयम ! मा पमायए ।।२८।।**

व्युच्छिन्धि स्नेहमात्मनः, कुमुदं शारदं वा पानीयम् ।
अथ सर्वस्नेहवर्जितः समयं गौतम ! मा प्रमादयेः ।।२८।।

**चिच्चा धणं च भारिअं, पव्वईओ हि सि अणगारिअं ।**
**मा वंतं पुणोवि आविए, समयं गोयम ! मा पमायए ।।२९।।**

त्यक्त्वा खलु धनं च भार्यां, प्रव्रजितो हि असि अनगारिताम् ।
मा वान्तं पुनरपि आपिवेः, समयं गौतम ! मा प्रमादयेः ।।२९।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अवउज्झिअ मित्तबंधवं, विउलं चेव धणोहसंचयं ।**
**मा तं बिइअं गवेसए, समयं गोयम ! मा पमायए**
**।।३०।।**

अपोह्य मित्रबान्धवं, विपुलं चेव धनौघसंचयम् ।
मा तद् द्वितीयं गवेषय, समयं गौतम ! मा प्रमादयेः ।।३०।।

**न हु जिणे अज्ज दिस्सई, बहुमए दिस्सई मग्गदेसिए ।**
**संपइ नेआउए पहे, समयं गोयम ! मा पमायए ।।३१।।**

नैव जिनोऽद्य दृश्यते, बहुमतः दृश्यते मार्गदेशितः ।
सम्प्रति नैयायिके पथि, समयं गौतम ! मा प्रमादयेः ।।३१।।

**अवसोहिअ कंटगापहं, ओइन्नोऽसि पहं महालयं ।**
**गच्छसि मग्गं विसोहिआ, समयं गोयम ! मा पमायए ।।३२।।**

अवशोध्य कण्टकपथं, अवतीर्णोऽसि पन्थानं महालयम् ।
गच्छसि मार्गं विशोध्य, समयं गौतम ! मा प्रमादयेः ।।३२।।

**अबले जह भारवाहए, मा मग्गे विसमेऽवगाहिआ ।**
**पच्छा पच्छाणुतावए, समयं गोयम ! मा पमायए ।।३३।।**

अबलो यथा भारवाहकः, मा मार्गं विषममवगाह्य ।
पश्यात् पश्यादनुपातकः, समयं गौतम ! मा प्रमादयेः ।।३३।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**तिन्नो हु सि अण्णवं महं, किं पुण चिट्ठसि तीरमागओ ? ।**
**अभितुर पारंगमित्तए, समयं गोयम ! मा पमायए ।।३४।**

तीर्ण एवासि अर्णवं महान्तं, किं पुनस्तिष्ठसि तीरमागतः ।
अभित्वरस्व पारं गन्तुं, समयं गौतम ! मा प्रमादयेः ।।३४।।

**अकलेवरसेणिमुस्सिआ, सिद्धिं गोयम ! लोअं गच्छसि**
**खेमं च सिवं अणुत्तरं, समयं गोयम ! मा पमायए ।।३५।।**

अकलेवरश्रेणिं उच्छ्रित्य, सिद्धिं गौतम ! लोकं गच्छसि ।
क्षेमं च शिवमणुत्तरं, समयं गौतम ! मा प्रमादयेः ।।३५।।

**बुद्धे परिनिव्वुडे चरे, गाम गए नगरे व संजए ।**
**संतिमग्गं च बूहए, समयं गोयम ! मा पमायए ।।३६।।**

बुद्धः परिनिर्वृतश्चरेः, ग्रामे गतो नगरे वा संयतः ।
शान्तिमार्गं च बृंहयेः, समयं गौतम ! मा प्रमादयेः ।।३६।।

**बुद्धस्स निसम्म भासिअं, सुकहियमट्ठपदोवसोहियं ।**
**रागं दोसं च छिंदिआ, सिद्धिं गइं गए भयवं गोयमे त्तिबेमि ।।३७।**

बुद्धस्य निशम्य भाषितं, सुकथितमर्थपदोपशोभितम् ।
रागं द्वेषं च छित्त्वा, सिद्धिं गतिं गतो भगवान् गौतम इति ब्रवीमि ।।३७।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

# श्री बहुश्रुतपूजाध्ययन-११

**संजोगो विप्पमुक्कस्स, अणगारस्स भिक्खुणो ।**
**आयारं पाउक्करिस्सामि, आणुपुव्विं सुणेह मे ।।१।।**

संयोगाद् विप्रमुक्तस्य, अनगारस्य भिक्षोः ।
आचारं प्रादुष्करिष्यामि, आनुपूर्वीं शृणुत मे ।।१।।

**जे आवि होइ निव्विज्जे, थद्धे लुद्धे अणिग्गहे ।**
**अभिक्खणं उल्लवई, अविणिए अबहुस्सुए ।।२।।**

यश्चापि भवति निर्विद्यः, स्तब्धो लुब्धः अनिग्रहः ।
अभीक्ष्णमुल्लपति, अविनीतः अबहुश्रुतः ।।२ ।।

**अह पंचहिं ठाणेहिं, जेहिं सिक्खा न लब्भइ ।**
**थंभा कोहा पमाएणं, रोगेणाऽऽलस्सएण य ।।३।।**

अथ पञ्चभिः स्थानैयैः, शिक्षा न लर्भ्यते ।
स्तम्भात्क्रोधात् प्रमादेन, रोगेणाऽऽलस्यकेन च ।।३।।

**अह अट्ठेहिं ठाणेहिं, सिक्खासीलेत्ति वुच्चइ ।**
**अहस्सिरे सयादंते, ण य मम्ममुदाहरे ।।४।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**णासीले ण विसीले, ण सिआ अइलोलुए ।**
**अक्कोहणे सच्चरए, सिक्खासीलेत्ति वुच्चइ ।।५।।**

**।। युग्मम् ।।**

अथाष्टाभिः स्थानैः शिक्षाशील इत्युच्यते ।
अहसिता सदा दान्तो, नं च मर्मोदाहरेत् ।।४।।

नाशीलो न विशीलो न स्यादतिलोलुपः ।
अक्रोधनः सत्यरतः, शिक्षाशील इत्युच्यते ।।५।।

।। युग्मम् ।

**अह चउद्दसहिं ठाणेहिं, वट्टमाणो उ संजए ।**
**अविणीए वुच्चइ सो उ, निव्वाणं च न गच्छइ ।।६।।**

**अभिक्खणं कोही भवइ, पबंधं च पकुव्वइ ।**
**मित्तिज्जमाणो वमइ, सुअं लद्धूण मज्जइ ।।७।।**

**अवि पावपरिक्खेवी, अवि मित्तेसु कुप्पइ ।**
**सुप्पियस्सावि मित्तस्स, रहे भासइ पावगं ।।८।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**पइण्णवाई दुहिले, थद्धे लुद्धे अनिग्गहे ।**
**असंविभागी अचियत्ते, अविणीएत्ति वुच्चइ ।।९।।**

**।। चुतर्भिः कलापकम् ।।**

*अथ चतुर्दशसु स्थानेषु, वर्तमानस्तु संयतः ।*
अविनीत उच्यते स तु, निर्वाणं च न गच्छति ।।६।।

अभीक्ष्णं क्रोधी भवति, प्रबन्धं च प्रकरोति ।
मित्रायमाणो वमति, श्रुतं लब्ध्वा माद्यति ।।७।।

अपि पापपरिक्षेपी, अपि मित्रेभ्यः कुप्यति ।
सुप्रियस्यापि मित्रस्य, रहसि भाषते पापकम् ।।८।।

प्रतिज्ञावादी द्रुहिलः स्तब्धः लुब्धः अनिग्रहः ।
असंविभागि अप्रीतिकः अविनीत इत्युच्यते ।।९।।

**।। चतुर्भिः कलापकम् ।।**

**अह पन्नरसहिं ठाणेहिं, सुविणीएत्ति वुच्चई ।**
**नीआवित्ती अचवले, अमाई अकुऊहले ।।१० ।।**

**अप्पं च अहिक्खिवइ, पबन्धं च न कुव्वइ ।**
**मित्तिज्जमाणो भयइ, सुअं लद्धुं न मज्जइ ।।११।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**न य पावपरिक्खेवी, न य मित्तेसु कुप्पई ।**
**अप्पिअस्साविं मित्तस्स, रहे कल्लाण भासइ ।।१२।।**

**कलहडमरवज्जए, बुद्धे अ अभिजाइए ।**
**हिरिमं पडिसंलीणे, सुविणीएत्ति वुच्चइ ।।१३।।**

**।। चतुर्भिः कलापकम् ।।**

अथ पञ्चदशभिः स्थानैः सुविनीत इत्युच्यते ।
नीचवर्ती अचपलः, अमायी अकुतूहलः ।।१०।।

अल्पं च अधिक्षिपति, प्रबन्धं च न करोति ।
मित्रायमाणो भजति, श्रुतं लब्ध्वा न माद्यति ।।११।।

न च पापपरिक्षेपी, न च मित्रेभ्यः कुप्यति ।
अप्रियस्यापि मित्रस्य, रहसि कल्याणं भाषते ।।१२।।

कलहडमरवर्जकः, बुद्धश्च अभिजातिगः ।
ह्रीमान् प्रतिसंलीनः, सुविनीत इत्युच्यते ।।१३।।

।। चतुर्भिः कलापकम् ।।

**वसे गुरुकुले निच्चं, जोगवं उवहाणवं ।**
**पिअंकरे पिअंवाई, से सिक्खं लध्धुमरिहई ।।१४।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

वसेत् गुरुकुले नित्यं, योगावानुपधानवान् ।
प्रियंकरः प्रियवादी, स शिक्षां लब्धुमर्हति ।।१४।।

**जहा संखम्मि पयं निहियं, दुहओ वि विरायइ ।**
**एवं बहुस्सुए भिक्खू, धम्मो कित्ती तहा सुयं ।।१५।।**

यथाशङ्के पयो निहितं, द्विधापि विराजते ।
एवं बहुश्रुते भिक्षौ, धर्मः कीर्तिस्तथा श्रुतम् ।।१५ ।।

**जहा से कंबोआणं, आइन्ने कंथए सिआ ।**
**आसे जवेण पवरे, एवं भवइ बहुस्सुए ।।१६।।**

यथा स कम्बोजानामाकीर्णः, कन्थकः स्यात् ।
अश्वो जवेन प्रवरः, एवं भवति बहुश्रुतः ।।१६।।

**जहाऽऽइण्णसमारूढे, सूरे दढपरक्कमे ।**
**उभओ नंदिघोसेणं, एवं भवइ बहुस्सुए ।।१७।।**

यथाऽऽकीर्णसमारूढः शूरो दृढपराक्रमः ।
उभयतो नन्दिघोषेण, एवं भवति बहुश्रुतः ।।१७।।

**जहा करेणुपरिकिन्ने, कुंजरे सट्ठिहायणे ।**
**बलवंते अप्पडिहए, एवं भवइ बहुस्सुए ।।१८।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

यथा करेणुपरिकीर्ण, कुञ्जरः, षष्टिहायनः ।
बलवानिप्रतिहतः, एव भवति बहुश्रुत ।।१८।।

**जहा से तिक्खसिंगे, जायक्खंधे विरायइ ।**
**वसहे जूहाहिवइ, एवं भवइ बहुस्सुए ।।१९।।**

यथा स तीक्ष्णशृंङ्गो, जातस्कन्धो विराजते ।
वृषभो यूथाधिपतिः, एवं भवति बहुश्रुतः ।।१९।।

**जहा से तिक्खदाढे, उदग्गे दुप्पहंसए ।**
**सीहे मिआए परवे, एवं भवइ बहुस्सुए ।।२०।।**

यथा स तीक्ष्णदंष्ट्रः, उदग्रो दुष्प्रघर्षकः ।
सिंहो मृगाणां प्रवरः, भवति बहुश्रुतः ।।२०।।

**जहा से वासुदेवे, संखचक्कगदाधरे ।**
**अप्पडिहयबले जोहे, एवं भवइ बहुस्सुए ।।२१।।**

यथा स वासुदेवः, शुङ्खचक्रगदाधरः ।
अप्रतिहतबलो योधः एवं भवति बहुश्रुतः ।।२१।।

**जहा से चाउरंते, चक्कवट्टी महिड्ढिए ।**
**चउद्दसरयणाहिवई, एवं भवइ बहुस्सुए ।।२२।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

यथा स चातुरन्त, श्चक्रवर्ती महर्द्धिकः ।
चतुर्दशरत्नाधिपतिः, एवं भवति बहुश्रुतः ।।२२।।

**जहा से सहस्सक्खे, वज्जपाणी पुरंदरे ।**
**सक्के देवाहिवई, एवं भवइ बहुस्सुए ।।२३ ।।**

यथा स सहस्राक्षो, वज्रपाणिः पुरन्दरः ।
शक्रो देवाधिपतिः, एवं भवति बहुश्रुतः ।।२३।।

**जहा से तिमिरविद्धंसे, उत्तिट्ठंते दिवायरे ।**
**जलंते इव तेएणं, एवं भवइ बहुस्सुए ।।२४।।**

यथा स तिमिर विध्वंसः, उत्तिष्ठन् दिवाकरः ।
ज्वलन्निव तेजसा, एवं भवति बहुश्रुतः ।।२४।।

**जहा से उडुवई चंदे, णक्खत्तपरिवारिए ।**
**पडिपुन्ने पुन्नमासीए, एवं भवइ बहुस्सुए ।।२५।।**

यथा स उडुपतिश्चन्द्रो, नक्षत्रपरिवारितः ।
प्रतिपूर्णः पौर्णमास्याम् एवं भवति बहुश्रुतः ।।२५।।

**जहा से सामाइआणं, कोट्ठागारे सुरक्खिए ।**
**णाणाधन्नपडिपुण्णे, एवं भवइ बहुस्सुए ।।२६।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

यथा स सामाजिकानां, कोष्ठागारः सुरक्षितः ।
नानाधान्यप्रतिपूर्णः, एवं भवति बहुश्रुतः ।।२६।।

**जहा सा दुमाण पवरा, जंबू णाम सुंदसणा ।**
**अणाढिअस्स देवस्स, एवं भवइ बहुस्सुए ।।२७।।**

यथा स द्रुमाणां, प्रवरा जम्बूर्नाम सुदर्शना ।
अनादृतस्य देवस्य, एवं भवति बहुश्रुतः ।।२७।।

**जहा सा नईण परवा, सलिला सागरंगमा ।**
**सीआ नीलवंतप्पवहा एवं भवइ बहुस्सुए ।।२८।।**

यथा सा नदीनां प्रवरा, सलिला सागरंगमा ।
शीता नीलवत्प्रवहा, एवं भवति बहुश्रुतः ।।२८।।

**जहा से नगाण पवरे, सुमहं मंदरे गीरी ।**
**नाणोसहिपज्जलिए, एवं भवइ बहुस्सुए ।।२९।।**

यथा सा नागानां प्रवरः, सुमहान् मन्दरो गिरिः ।
नानौषधिप्रज्वलितः एवं भवति बहुश्रुतः ।।२९।।

**जहा से संयभुरमणे, उद्गही अक्खओदए ।**
**नाणारयणपडिपुन्ने, एवं भवइ बहुस्सुए ।।३०।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

यथा स स्वयम्भूरमणोदधिक्षयोदकः ।
नानारत्नप्रतिपूर्णः, एवं भवति बहुश्रुतः ।।३०।।

**समुद्दगंभीरसमा दुरासया,**
**अचक्किआ केरई दुप्पहंसया ।**
**सुअस्स पुण्णा विउलस्स ताइणो,**
**खवित्तु कम्मं गइमुत्तमं गया ।।३१।।**

समुद्रगाम्भीर्यसमा दुराश्रया,
अचकिताः केनापि दुष्प्रधर्षाः ।
श्रुतेन पूर्णा विपुलेन त्रायिणः,
क्षपयित्वा कर्म्म गतिमुत्तमां गताः ।।३१।।

**तम्हा सुअमहिट्ठिज्जा,**
**उत्तमट्ठगवेसए ।**
**जेणप्पाणं परं चेव सिद्धिं**
**संपाउणिज्जासि त्तिबेमि ।।३२।।**

तस्मात् श्रुतमधितिष्ठेदुत्तमार्थगवेषकः ।
येनात्मानं परं चैव, सिद्धिं सम्प्रापयेत् इति ब्रवीमि ।।३२।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

# श्री हरीकेशीयाध्ययन-१२

**सोवागकुलसंभूओ, गुणुत्तरधरो मुणी ।**
**हरिएसबलो नामं, आसी भिक्खू जिइंदिओ ।।१।।**

श्वपाककुलसंभूतो, गुणोत्तरधरो मुनिः।
हरिकेषबलो नाम, आसीद् भिक्षुर्जितेन्द्रियः ।।१।।

**इरिएसणभासाए, उच्चारे समिईसु अ ।**
**जओ आयाण णिक्खेवे, संजओ सुसमाहिओ ।।२।।**

**मणगुत्तो वयगुत्तो, कायगुत्तो जिइंदिओ ।**
**भिक्खट्ठा बंभइज्जम्मि, जन्नवाडमुवट्ठिओ ।।३।।**

**।। युग्मम् ।।**

ईर्यैषणाभाषोच्चारसमितिषु च ।
यत आदाननिक्षेपे, संयतः सुसमाहितः ।।२।।

मनोगुप्तो वचोगुप्तः, कायगुप्तो जितेन्द्रियः ।
भिक्षार्थं ब्रह्मेज्ये, यज्ञपाट उपस्थितः ।।३।।

।। युग्मम् ।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**तं पासिऊणमेज्जतं, तवेण परिसोसिअं ।**
**पंतोवहिउवगरणं, उवहसंति अणारिआ ।।४।।**

तं दृष्ट्वा आयान्तं, तपसा परिशोषितम् ।
प्रान्तोपध्युपकरणं, उपहसन्ति अनार्याः ।।४।।

**जाईमयपडित्थद्धा, हिंसगा अजिइंदिआ ।**
**अबंभचारिणो बाला, इमं वयणमब्बवी ।।५।।**

जातिमदप्रतिस्तब्धाः हिंसकाः अजीतेन्द्रियाः ।
अब्रह्मचारिणो बाला, इदं वचनमब्रुवन् ।।५।।

**कयरे आगच्छइ दित्तरूवे, काले विगराले फोक्कनासे ।**
**ओमचेलए पंसुपिसायभूए, संकरदूसं परिहरिअ कंठे ।।६।।**

कतर आगच्छति दीप्तरूपः, कालो विकरालः फोक्कनासः ।
अवमचेलकः पांशुपिशाचभूतः, सङ्करदूष्यं परिधृत्य कण्ठे ।।६।।

**कयरे तुमं इअ अदंसणिज्जे,**
**काए व आसा इहमागओसि ।**
**ओमचेलगा ! पंसुपिसायभूआ !,**
**गच्छ क्खलाहि किमिह ट्ठिओऽसि ।।७।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

कतररस्त्वमित्यदर्शनीयः,

कया वा आशया इहागतोऽसि ।

अवमचेलक ! पांशुपिशाचभूत !,

गच्छ स्खल किमिह स्थितोऽसि ।।७।।

**जक्खो तहिं तिंदअरुक्खवासी,**

**अणुंकपओ तस्स महामुणिस्स ।**

**पच्छायइत्ता नियगं सरीरं,**

**इमाइं वयणाइं उदाहरित्था ।।८।।**

यक्षस्तत्र तिन्दुकवृक्षवासी, अनुकम्पकः तस्य महामुनेः ।
प्रच्छाद्य निजकं शरीरं, इमानि वचनानि उदाहरत् ।।८।।

**समणो अहं संजओ बंभयारी,**

**विरओ धणपयणपरिग्गहाओ।**

**परप्पवित्तस्स उ भिक्खकाले,**

**अन्नस्स अट्ठा इहमागओम्हि ।।९।।**

श्रमणोऽहं संयतो ब्रह्मचारी, विरतौ धनपचनपरिग्रहात् ।
परप्रवृत्तस् तु भिक्षाकाले, अन्नस्य अर्थाय इहागतोऽस्मि ।।९।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**विअरिज्जइ खज्जइ भोज्जइ अ, अन्नं पभूअं भवयाणमेअं ।**
**जाणाह मे जायणजीविणंति, सेसावसेसं लहऊ तवस्सी ।।१०।।**

वितीर्यते खाद्यते भुज्जते च, अन्नं प्रभूतं भवतामेतत् ।
जानीत मां याचनजीविनमिति, शेषावशेषं लभतां तपस्वी ।।१०।।

**उवक्खडं भोअण माहणाणं, अत्तट्ठिअं सिद्धमिहेगपक्खं ।**
**न हु वयं एरिसमन्नपाणं, दाहामु तुब्भ किमिहं ठिओऽसि ।।११।।**

उपस्कृतं भोजनं ब्राह्मणेभ्यः, आत्मार्थिकं सिद्धमिहैकपक्षम् ।
न तु वयमीदृशमन्नपानं, दास्यास्तुभ्यं किमिह स्थितोऽसि ।।११।।

**थलेसु बीआइं वेवेति कासया, तहेव निन्नेसु अ आससाए ।**
**एआए सद्धाए दलाहि मज्झं, आराहए पुन्नमिणं खु खित्तं ।।१२।।**

स्थलेषु बीजानि वपन्ति कर्षकाः, तथैव निम्नेषु च आशंसया ।
एतया श्रद्धया दत्त, मह्यमाराधयेत्पुण्यमिदं खलु क्षेत्रम् ।।१२।।

**खित्ताणि अम्हं विइआणि लोए,**
**जहिं पकिन्ना विरुहंति पुण्णा ।**
**जे माहणा जाइविज्जोववेआ,**
**ताइं तु खित्ताइं सुपेसलाइं ।।१३।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

क्षेत्राणि अस्माकं विदितानि लोके,

यत्र प्रकीर्णात् विरोहन्ति पुण्यानि ।

ये ब्राह्मणाः जातिविद्योपेतास्तानि,

तु क्षेत्राणि सुपेशलानि ।।१३।।

**कोहो अ माणो अ वहो अ जेसिं,**

**मोसं अदत्तं च परिग्गहो अ ।**

**ते माहणा जाइविज्जाविहूणा,**

**ताइं तु खेत्ताइं सुपावगाइं ।।१४।।**

क्रोधश्च मानश्च वधश्च येषां, मृषा अदत्तं च परिग्रहश्च ।

ते ब्राह्मणाः जातिविद्याविहीनास्तानि, तु क्षेत्राणि सुपापकानि ।।१४।।

**तुब्भेत्थ भो ! भारहरा गिराणं,**

**अट्ठं न जाणाह अहिज्ज वेए ।**

**उच्चावचाइं मुणिणो चरंति,**

**ताइं तु खेत्ताइं सुपेसलाइं ।।१५।।**

यूयमऽत्र भोः ! भारधरा गिरामर्थं न जानीथाधीत्य वेदान् ।

उच्चावचानि मुनयश्चरन्ति, तानि तु क्षेत्राणि सुपेशलानि ।।१५।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अज्झावयाणं पडिकूलभासी,**

**पभाससे किं नु सगासि अम्हं ।**

**अवि एअं विणस्स-उ-अण्णपाणं,**

**न य णं दाहामु तुमं नियंठा ! ।।१६।।**

अध्यापकानां प्रतिकूलभाषी,

प्रभाषसे किं नु सकाशेऽस्माकम् ।

अप्येतद् विनश्यतु अन्नपानं,

न च खलु दास्यामो तुभ्यं निर्ग्रन्थ ! ।।१६।।

**समिईहिं मज्झ सुसमाहि अस्स,**

**गुत्तीहिं गुत्तस्स जीइंदिअस्स ।**

**जइ मे न दाहित्थ अहेसणिज्जं,**

**किमज्ज जन्नाण लभित्थ लाभम् ।।१७।।**

समितिभिर्मह्यं सुसमाहिताय,

गुप्तिभिर्गुप्ताय जितेन्द्रियाय ।

यदि मेन दास्यथ अथैषणीयं,

किमद्य यज्ञानां लप्स्यध्वे लाभम् ।।१७।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**के इत्थ खत्ता उवजोइआ वा,**

**अज्झावया वा सह खंडिएहिं ।**

**एअं खु दंडेण फलेण हंता,**

**कंठम्मि धित्तूण खलेज्ज जो णं ।।१८।।**

केऽत्र क्षत्रा उपज्योतिष्का वा, अध्यापका वा सह खण्डिकैः ।
एवं खलु दण्डेन फलेन हत्वा, कण्ठे गृहीत्वा स्खलयेयुर्ये खलु ।।१८।।

**अज्झावयाणं वयणं सुणित्ता, उद्धाइआ तत्थ बहू कुमारा।**
**दंडेहिं वेत्तेहिं केसेहिं चेव, समागया तं इसिं तालयंति ।।१९।।**

अध्यापकानां वचनं श्रुत्वा, उद्धावितास्तत्र बहवः कुमाराः ।
दण्डैर्वेत्रैः कशाभिश्चैव, समागतास्तमृषिं ताड्यन्ति ।।१९।।

**रण्णो तहिं कोसलिअस्स धूया,**

**भद्दत्ति नामेण अणिंदिअंगी ।**

**तं पासिआ संजयं हम्ममाणं,**

**कुद्धे कुमारे परिनिव्ववेइ ।।२०।।**

राज्ञस्तत्र कौसलिकस्य दुहिता, भद्रैति नाम्ना अनिन्दिताङ्गी ।
तं दृष्ट्वा संयतं हन्यमानं, क्रुद्धान् कुमारांन् परिनिर्वापयति ।।२०।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**देवाभिओगेण निओइएणं, दिन्नामु रण्णा मणसा न झाया ।**
**नरिंददेविंदऽभिवंदिएणं, जेणामि वंता इसिणा स एसो ।।२१।।**

देवाभियोगेन नियोजितेन, दत्तास्मि राज्ञा मनसा न ध्याता ।
नरेन्द्रदेवेन्द्राभिवन्दितेन, येनास्मि वान्ता ऋषिणा स एषः ।।२१।।

**एसो हु सो उग्गतवो महप्पा,**
**जिइंदिओ संजओ बंभयारी ।**
**जो मे तया निच्छइ दिज्जमाणिं,**
**पिउणा सयं कोसलिएण रन्ना ।।२२।।**

एष खलु स उग्रतपा महात्मा, जितेन्द्रियः संयतो ब्रह्मचारी ।
यो मां तदा नेच्छति दीयमानां, पित्रा स्वयं कोसलिकेन राज्ञा ।।२२।।

**महाजसो एस महाणुभागो,**
**घोरव्वओ घोरपरक्कमो अ ।**
**मा एअं हीलह अहीलणिज्जं,**
**मा सव्वे तेएण भे णिद्दहिज्जा ।।२३।।**

महाशया एष महानुभागो, घोरव्रतो घोरपराक्रमश्च ।
मैनं हीलयताहीलनीयं, मा सर्वान् तेजसा भवतो निर्द्धाक्षीत् ।।२३।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**एयाइं तीसे वयणाइं सुच्चा,**

**पत्तीइ भद्दाइ सुभासिआइं ।**

**इसिस्स वेआवडिअट्ठयाए,**

**जक्खा कुमारे विनिवारयंति ।।२४।।**

एतानि तस्याः वचनानि श्रुत्वा, पत्न्या भद्रायाः सुभाषितानि ।
ऋषेर्वैयावृत्यार्थं, यक्षा कुमारन् विनिवारयन्ति ।।२४।।

**ते घोररुवा ठिअ अंतलिक्खे,**

**असुरा तहिं तं जणं तालयंति ।**

**ते भिन्नदेहे रुहिरं वमंते,**

**पासित्तु भद्दा इणमाहु भुज्जो ।।२५।।**

ते धोररूपा स्थिता अन्तरिक्षे, असुरास्तत्र तं जनं ताडयन्ति
तान् भिन्नदेहान् रुधिरं वमतो, दृष्ट्वा भद्रेदमाहुर्भूयः ।।२५।।

**गिरिं नहेहिं खणह, अयं दंतेहि खायह ।**

**जायतेअं पाएहिं हणह, जे भिक्खुं अवमन्नह ।।२६।।**

गिरिं नखैः खनथ, अयो दन्तैः खादथ ।
जाततेजसं पादैः हथ, ये भिक्षुमवमन्यध्वे ।।२६।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**आसीविसो उग्गतवो महेसी,**

**घोरव्वओ घोरपरकम्मो अ ।**

**अगणिं व पक्खंद पंयगसेणा,**

**जे भिक्खुअं भत्तकाले वहेह ।।२७।।**

आशीविष उग्रतपा महर्षिः,

घोरव्रतो घोरपराक्रमश्च ।

अग्निमिव प्रकन्दथ पतङ्गसेना,

ये भिक्षुं भक्तकाले विध्यथ ।।२७।।

**सीसेण एअं सरणं उवेह,**

**समागया सव्वजणेण तुब्भे।**

**जइ इच्छह जीविअं वा धणं वा,**

**लोअंपि एसो कुविओ डहेज्जा ।।२८।।**

शीर्षेण एतं शरणं उपेत, समागताः सर्वजनेन यूयम् ।

यदीच्छत जीवितं वा धनं वा, लोकमपि एष कुपितो दहेत् ।।२८।।

**अवहेडिअ पिट्ठ सउत्तमंगे, पसारिआबाहु अकम्मचिट्ठे ।**

**निब्भेरितच्छे रुहिरं वमंते, उड्ढंमुहे निग्गय जीहनेत्ते ।।२९।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**ते पासिंआ खंडिअ कट्ठभूए,**

**विमण्णो विसण्णो अह माहणो सो ।**

**इसिं पसादेति सभारिआओ,**

**हीलं च निंदं च खमाह भंते ।।३०।।**

**।। युग्मम् ।।**

अवहेठितपृष्टसदुत्तमाङ्गाः,

प्रसारितबाहूकर्मचेष्टाः ।

प्रसारितान्यक्षीणि रूधिरं वमतः,

उद्ध्र्वमुखान् निर्गतजिह्वानेत्रान् ।।२९।।

तान् दृष्ट्वा खण्डिकान् काष्ठभूतान्,

विमना विषण्णः अथ ब्राह्मणः सः ।

ऋषिं प्रसादयति सभार्याको,

हीला च निंदां च क्षमध्वं भदन्त ! ।।३०।।

।। युग्मम् ।।

**बालेहिं मूढेहिं अयाणएहिं, जं हीलिआ तस्स खमाह भंते ।**

**महप्पसाया इसिणो हवंति, न हु मुणी कोवपरा हवंति ।।३१।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

बालैः मूढैः अजानिद्भिः, यत् हीलिताः तत् क्षमध्वं भदन्त ।
महाप्रसादा ऋषयो भवन्ति, न खलु मुनयः कोपपरा भवन्ति ।।३१।।

**पुव्विं च इण्हिं च अणागयं च,**
**मणप्पओसो न मे अत्थि कोई ।**
**जक्खा हु वेआवडिअं करेन्ति,**
**तम्हा हु एए निहया कुमारा ।।३२।।**

पूर्वं चेदानीं चानागते च,
मनःप्रद्वेषो न मे अस्ति कोऽपि ।
यक्षाः खलु वैयावृत्यं कुर्वन्ति,
तस्मात्खलु एते निहताः कुमाराः ।।३२।।

**अत्थं च धम्मं च विआणमाणा,**
**तुब्भे णवि कुप्पह भूइपण्णा ।**
**तुब्भं तु पाए सरणं उवेमो,**
**समागया सव्वजणेण अम्हे ।।३३।।**

अर्थं च धर्मं च विजानन्तो, यूयं नापि कुप्यथ भूतिप्रज्ञाः ।
युष्माकं तु पादौ शरणं उपेमः, समागताः सर्वजनेन वयम् ।।३३।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अच्चेमु ते महाभाग !, न ते किंचि न अच्चिमो।**
**भुंजाहि सालिमं कूरं, नाणावंजणसुंजअं ।।३४।।**

अर्चयामः त्वां महाभाग ! न तव किञ्चिन्न अर्चयामः ।
मुङ्क्ष्व शालियमं कूरं, नानाव्यञ्जनसंयुतम् ।।३४।।

**इमं च मे अत्थि पभूअमन्नं, तं भूंजसु अम्हमणुग्गहट्ठा ।**
**बाढंति पडिच्छइ भत्तपाणं, मासस्स उ पारणए महप्पा ! ।।३५।।**

इदं च ममाऽस्ति प्रभूतमन्नं, तत् भुङ्क्ष्व अस्माकमनुग्रहार्थम् ।
बाढमिति प्रतिच्छति भक्तपानं, मासस्यैव पारणकं महात्मा ।।३५।।

**तह्अिं गंधोदयपुप्फवासं, दिव्वा तहिं वसुहारा य वुट्ठा ।**
**पहयाओ दुंदुहीओ सुरेहिं, आगासे अहो दाणं च धुट्ठं ।।३६।।**

तत्र गन्धोदकपुष्पवर्षं, दिव्या तत्र वसुधारा च वृष्टा ।
प्रहत्ता दुन्दुभयः सुरैः, आकाशे अहो दानं च धुष्टम् ।।३६।।

**सक्खं खु दीसइ तवोविसेसो, न दीसई जाइविसेसु कोई ।**
**सोवागपुत्तं हरिएससाहुं, जस्सेरिया इड्ढि महाणुभागा ।।३७।।**

साक्षादेव दृश्यते तपोविशेषः, न दृश्यते जातिविशेषः कोऽपि ।
श्वपाकपुत्रं हरिकेशसाधुं, यस्येदृशी ऋद्धिर्महानुभागा ।।३७।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**किं माहाणा ! जोई समारभंता,**

**उदएण सोहिं बहिआ विमग्गह ।**

**जं मग्गहा बाहिरिअं विसोहिं,**

**न तं सुदिट्ठं कुसला वयंति ।।३८।।**

किं माहनाः ज्योतिः समारभमाणाः,

उदकेन शोधिं बाह्यां विमार्गयथ ।

यद् मार्गयथ बाह्यां विशुद्धिं,

न तत् सुदृष्टं कुशला वदन्ति ।।३८।।

**कुसं च जूवं तणकट्ठमग्गिं,**

**सायं च पायं उदयं फूसंता ।**

**पाणाइं भूआइं विहेडयंता,**

**भुज्जोवि मंदा पकरेह पावं ।।३९।।**

कुशं च यूपं तृणकाष्टमग्निं,

सायं च प्रातरुदकं स्पृशन्तः ।

प्राणीनो भूतान् विहेठमानाः,

भूयोऽपि मन्दा प्रकुरुथ पापम् ।।३९।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**कहं चरे भिक्खु ! वयं जयामो,**

**पावाइं कम्माइं पणोल्लयामो ।**

**अक्खाहि णो संजय जक्खपूइआ,**

**कहं सुइट्ठं कुसला वयन्ति ।।४०।।**

कथं चमारो भिक्षो ! वयं यजामो,

पापानि कर्माणि प्रणुदामः ।

आख्याहि नो संयत यक्षपूजित !

कथं स्विष्टं कुशला वदन्ति ।।४०।।

**छज्जीवकाए असमारभंता, मोसं अदत्तं च असेवमाणा ।**

**परिग्गहं इत्थिओ माणमायं, एअं परिण्णाय चरंति दंता ।।४१।।**

षड्जीवकायानसमारभमाणा, मृषां अदत्तं चासेवमाना ।

परिग्रहं स्त्रियो मानंमायं, एतत्परिज्ञाय चरन्ति दान्ताः ।।४१।।

**सुसंवुडा पंचेहिं संवरेहिं, इह जीविअं अणवकंखमाणा ।**

**वोसट्टकाया सुइचत्तदेहा महाजयं जयई जण्णसिट्ठं ।।४२।।**

सुसंवृताः पञ्जभिः संवरैः इह जीवितमनवकांक्षन्तः ।

व्युत्सृष्टकायाः शुचित्यक्तदेहाः, महाजयं यजन्ति यज्ञश्रेष्ठम् ।।४२।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**के ते जोई किंव ते जोइठाणं,**

**का ते सुआ किं व ते कारिसंगं ।**

**एहा य ते कयरा संति भिक्खू,**

**कयरेण होमेण हुणासि जोइं ।।४३।।**

कि ते ज्योतिः ? किं वा ते ज्योतिः स्थानं ?,

कास्ते स्त्रुचो किं वा ते करीषाङ्गम् ।

एधाश्च ते कतरा शान्तिर्भिक्षो !

कतरेण होमेन जुहोषि ज्योतिः ।।४३।।

**तवो जोई जीवो जोइठाणं,**

**जोगा सुआ सरीरं कारिसंगं ।**

**कम्मे एहा संजमजोग संती,**

**होमं हुणामि इसिणं पसत्थं ।।४४।।**

तपो ज्योतिर्जीवो ज्योतिः स्थानं,

योगा स्त्रुचः शरीरं करीषांगम् ।

कर्म एधाः संयमयोगाः शान्तिः,

होमेन जुहोमि ऋषीणां प्रशस्तम् ।।४४।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**के ते हरए के अ ते संतितित्थे,**

**कहिंसि ण्हाओ व रयं जहासि ।**

**अक्खाहि णो संजयजक्खपूइआ,**

**इच्छामु नाउं भवओ सगासे ।।४५।।**

कस्तेह्रदो ? किं च ते शान्त्यै तीर्थं ?,

कस्मिंन् स्नातः वा रजः जहासि ।

आचक्ष्व नो संयत यक्षपूजित !

इच्छामो ज्ञातुं भवतः सकाशे ।।४५।।

**धम्मे हरए बंभे संतितित्थे,**

**अणाइले अत्तपसन्नलेसे ।**

**जहिंसि ण्हाओ विमलो विसुद्धो,**

**सुसीतिभूओ पजहामि दोसं ।।४६।।**

धर्मः ह्रदः ब्रह्मः शान्तितीर्थं,

अनाविले आत्मप्रसन्नलेश्यम् ।

यस्मिन् स्नातो विमलो विशुद्धः,

सुशीतीभूतो प्रजहामि दोषम् ।।४६।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**एअं सिणाणं कुसलेहिं दिट्ठं,**

**महासिणाणं इसिणं पसत्थं ।**

**जहिंसि णाया विमला विसुद्धा,**

**महारिसी उत्तमठाणं पत्त त्तिबेमि ।।४७।।**

एतत् स्नानं कुशलैर्दृष्टं,

महास्नानं ऋषीणां प्रशन्तं ।

येन स्नाता विमला विशुद्धा,

महर्षयः उत्तमस्थानं प्राप्ता इति ब्रवीमि ।।४७।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

# श्री चित्रसंभूताध्ययन-१३

**जाईपराजिओ खलु, कासि निआणं तु हत्थिणपुरंमि ।**
**चुलणीइ बंभदत्तो, उववन्नो पउमगुम्माओ ।।१।।**

जातिपराजितः खलु, अकार्षीन्निदानं तुः हस्तिनापुरे ।
चुलन्यां ब्रह्मदत्त, उत्पन्नः पद्मगुल्मात् ।।१।।

**कंपिल्ले संभूओ चित्तो, पुण जाओ पुरिमतालंभि ।**
**सिट्ठिकुलंभि विसाले, धम्मं सोऊण पव्वईओ ।।२।।**

काम्पील्ये सुम्भूतश्चित्रः, पुनर्जातः पुरिमताले ।
श्रेष्ठिकुले विशाले, धर्मं श्रुत्वा प्रव्रजितः ।।२।।

**कंपिल्लमि अ णयरे, समागया दोवि चित्तसंभूआ ।**
**सुहदुक्खफलविवागं, कहंति ते इक्कमिक्कस्स ।।३।।**

काम्पील्ये च नगरे, समागतौ द्वावपि चित्रसम्भूतौ ।
सुखदुःखफलविपाकं, कथयतस्तौ एकैकस्य ।।३।।

**चक्कवट्टी महिड्ढीओ, बंभदत्तो महायसो ।**
**भायरं बहुमाणेणं, इमं वयणमब्बवी ।।४।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

चक्रवर्ती महर्द्धिको, ब्रह्मदत्तो महायशाः ।
भ्रातरं बहुमानेन, इदं वचनमब्रवीत् ।।४।।

**आसिमो भायरा दोवि, अन्नमन्नवसाणुगा ।**
**अन्नमन्नमणुरत्ता, अन्नमन्नहिएसिणो ।।५।।**

आवां भ्रातरौ द्वावपि, अन्योन्यवशनुगौ ।
अन्योन्यमनुरक्तौ, अन्योन्यं हितैषिणो ।।५।।

**दासा दसण्णे आसि, मिआ कालिंजरे नगे ।**
**हंसा मयंगतीराए, सोवागा कासिभूमिए ।।६।।**

**देवा य देवलोगम्मि, आसि अम्हे महिड्ढिया ।**
**इमा णो छट्ठिआ जाई, अन्नमन्नेण जा विणा ।।७।।**

**।। युग्मम् ।।**

दासौ दशार्णे अभूव, मृगौ कालिंजरे नगे ।
हंसो मृतगङ्गातीरे, श्वपाकौ काशीभूमौ ।।६।।

देवौ च देवलोके, अभूव आवां महर्द्धिकौ ।
इयं आवयोः षष्टिका जातिः, अन्योन्येन या विना ।।७।।

।। युग्मम् ।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**कम्मा निआणप्पगडा, तुमे राय ! विचिंतिआ ।**
**तेसिं फलविवागेणं, विप्पओगमुवागया ।।८।।**

कर्माणि निदानप्रकृतानि, त्वया राजन ! विचिन्तितानि ।
तेषां फलविपाकस्तेन, विप्रयोगमुपागतौ ।।८।।

**सच्चसो अप्पगडा कम्मा मए पुरा कडा ।**
**ते अज्ज परिभुंजामो, किं नु चित्तोवि से तहा ।।९।।**

सत्यशौचप्रकटानि, कर्माणि मया पुराकृतानि ।
तान्यद्य परभुंजे, किं नु चित्रोऽपि तानि तथा ।।९।।

**सव्वं सुचिण्णं सफलं नराणं,**
**कडाण कम्माण न मुक्खु अत्थि ।**
**अत्थेहि कामेहि य उत्तमेहिं,**
**आया ममं पुण्णफलोववेए ।।१०।।**

सर्वं सुचीर्णं सफलं नराणां,
कृतेभ्यो कर्मभ्यो न मोक्षोऽस्ति ।
अर्थैः कामैश्च उत्तमैः,
आत्मा मम पुण्यफलोपपेतः ।।१०।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**जाणासि संभूअ ! महाणुभागं,**
**महिड्ढिअं पुण्णफलोववेअं ।**
**चित्तंपि जाणाहि तहेव रायं,**
**इड्ढी जुई तस्सवि अ प्पभुआ ।।११।।**

जानासि सम्भूत ! महानुभागं,
महर्द्धिकं पुण्यफलोपपेतम् ।
चित्रमपि जानीहि तथैव राजन् !,
ऋद्धिर्द्युतिः तस्यापि च प्रभूता ।।११।।

**महत्थरूवा वयणप्पभूआ,**
**गाहाणुगीआ नरसंगमज्झे ।**
**जं भिक्खुणो सीलगुणोववेआ,**
**इहज्जयंते समणोम्हि जाओ ।।१२।।**

महार्थरूपा वचनाप्रभुता,
गाथानुगीता नरसङ्घमध्ये ।
यां भिक्षवो शीलगुणोपपेता,
इह यतन्ते श्रमणोस्मि जातो ।।१२।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**उच्चोदए महुकक्के अ बंभे,**
**पवेइआ आवसहा य रम्मा ।**
**इमं गिहं चित्तधणप्पभूअं,**
**पसाहि पंचालगुणोववेअं ।।१३।।**

उच्चोदयो मधुः कर्कः च ब्रह्मा, प्रवेदिता आवसथाश्च रम्या ।
इदं गृहं चित्रधनप्रभूतं, प्रशाधि पाञ्चालगुणोपपेतम् ।।१३।।

**नट्टेहिं गीएहिं अ वाइएहिं,**
**नारीजणाइं परिवारयंतो ।**
**भुंजाहि भोगाइं इमाइं भिक्खु,**
**मम रोअइ पब्वज्जा हु दुक्खं ।।१४।।**

नृत्यैर्गीतैश्च वादित्रैः, नारीजनात् परिवारयन् ।
भुंक्ष्व भोगानिमान् भिक्षो ! मह्यं रोचते प्रव्रज्या हु दुःखम् ।।१४।।

**तं पुव्वनेहेण कयाणुरागं,**
**नराहिवं कामगुणेसु गिद्धं ।**
**धम्मस्सिओ तस्य हि आणुपेहि,**
**चित्तो इमं वयणमुदाहरित्था ।।१५।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

तं पूर्वस्नेहेन कृताननुरागं, नराधिपं कामगुणेषु गृद्धम् ।
धर्माश्रितस्तस्य हितानुप्रेक्षी, चित्रः इदं वचनमुदाहृतवान् ।।१५।।

**सव्वं विलविअं गीअं, सव्वं नट्टं विडंबिअं ।**
**सव्वे आहरणा भारा, सव्वे कामा दुहावहा ।।१६।।**

सर्वं विलसितं गीतं, सर्वं नृत्यं विडम्बितम् ।
सर्वाण्याभरणानि भाराः, सर्वे कामा दुःखावहाः ।।१६।।

**बालाभिरामेसु दुहावहेसु, न तं सुहं कामगुणेसु रायं ! ।**
**विरत्तकामाण तवोधणाणं, जं भिक्खूणं सीलगुणे रयाणं ।।१७।।**

बालाभिरामेषु दुःखावहेषु, न तत्सुखं कामगुणेषु राजन् ।
विरक्तकामानां तपोधनानां यद् भिक्षूणां शीलगुणे रतानाम् ।।१७।।

**नरिंद जाई अहमा नराणं, सोवागजाई दुहओ गयाणं ।**
**जहिं वयं सव्व जणस्स वेसा, वसीअ सोवागनिवेसणेसु ।।१८।।**

नरेन्द्र ! जातिरधमा नराणां, श्वपाकजाति द्वयोर्गतयोः ।
यस्यां आवां सर्वजनस्य द्वेष्यौ, अवसाव श्वपाक निवेशनेषु ।।१८।।

**तीसे अ जाईइ उ पाविआए, वुच्छा मु सोवागनिवेसणेसु ।**
**सव्वस्स लोगस्स दुगुंछणिज्जा, इहं तु कम्माइं पुरेकडाइं ।।१९।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

तस्यां च जातौ तु पापिकायां, उषितावावां श्वपाकनिदेशनेषु ।
सर्वस्य लोकस्य जुगुप्सनीयौ, अस्मिन् तु कर्माणि पुराकृतानि ।।१९।।

**सो दाणिं सि राय महाणुभागो,**
**महिड्ढिओ पुण्णफलोववेओ ।**
**चइत्तु भोगाइं असासयाइं,**
**आयाणहेऊ अभिनिक्खमाहि ।।२०।।**

स इदानीं राजा महानुभागो, महर्द्धिकः पुण्यफलोपपेतः ।
त्यक्त्वा भोगोनशाश्वतान्, आदानहेतोरभिनिष्क्राम ।।२०।।

**इह जीवीए राय ! असासयंमि,**
**धणिअं तु पुण्णाइ अकुव्वमाणो ।**
**से सोअइ मच्चुमुहोवणीए,**
**धम्मं अकाऊण परम्मि लोए ।।२१।।**

इह जीविते राजन्नशाश्वते,
अतिशयेन तु पुण्यानि अकुर्वाणः ।
स शोचति मृत्युमुखोपनीतः,
धर्ममकृत्वा परस्मिंश्च लोके ।।२१।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**जहेह सीहोव मिअं गहाय,**

**मच्चु नरं नेह हु अंतकाले ।**

**न तस्स माया व पिआ व भाया,**

**कालंमि तम्मि सहरा भवंति।।२२।।**

यथेह सिंहो वा मृगं गृहीत्वा,

मृत्यु नरं नयति हु अन्तकाले ।

न तस्य माता वा पिता वा भ्राता,

काले तस्मिन्नंशधरा भवन्ति ।।२२।।

**न तस्स दुक्खं विभयंति नाइओ,**

**न मित्तवग्गा न सुआ न बंधवा ।**

**इक्को सयं पच्चणुहोइ दुक्खं,**

**कत्तारमेवं अणुजाई कम्मं ।।२३ ।।**

न तस्य दुःख विभजन्ते ज्ञातयो;

न मित्रवर्गाः न सुताः न बान्धवाः ।

एकः स्वयं प्रत्यनु भवति दुःखं,

कर्तारमेवं अनुयाति कर्म ।।२३।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**चिच्चा दुपयं च चउप्पयं च,**

**खित्तं गिहं धणं धन्नं च सव्वं ।**

**सकम्मप्पबीओ अवसो पयाइ,**

**परं भवं सुन्दरं पावगं वा ।।२४।।**

त्यक्त्वा द्विपदं च चतुष्पदं च, क्षेत्रं गृहं धनं धान्यं च सर्वम् ।
स्वकर्मात्मद्वितीयः अवशो प्रयाति, परं भवं सुन्दरं पापकं वा ।।२४।।

**तं इक्कगं तुच्छ शरीरगं से,**

**चिईगयं दहिअ उ पावगेणं ।**

**भज्जा य पुत्तोवि अ नायओ वा,**

**दायारमन्नं अणुसंकमंति ।।२५।।**

तदेककं तुच्छशरीरकं तस्य, चितिगतं दग्ध्वा तु पावकेन ।
भार्या च पुत्रोऽपि च ज्ञातयश्च, दातारमन्यमनुसंक्रामति ।।२५।।

**उवनिज्जइ जीविअमप्पमायं,**

**वण्णं जरा हरइ नरस्स रायं ।**

**पंचालराया वयणं सुणाहि,**

**मा कासि कम्माइं महालयाइं ।।२६।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

उपनीयते जीवितमप्रादं, वर्णं जरा हरति नरस्य राजन् ।
पाञ्चालराजा ! वचनं श्रृणु, मा कार्षीः कर्माणि महालयानि ।।२६।।

**अहंपि जाणामि जहेह साहू,**
**जं मे तुमं साहसि वक्कमेअं ।**
**भोगा इमे संगकरा हवंति,**
**जे दुच्चया अज्जो ! अम्हारिसेहि ।।२७।।**

अहमपि जानामि यथेह साधो !
यन्मे त्वं साधयसि वचः एतत् ।
भोगा इमे सङ्गकरा भवन्ति,
ये दुस्त्यजा आर्य ! अस्मादृशैः ।।२७।।

**हस्तिणपुरंमि चित्ता, दुट्ठूणं नरवइं महिड्ढिअ ।**
**कामभोगेसु गिद्धेणं, निआणमसुहं कडं ।।२८।।**
**तस्स मे अप्पडिकंतस्स, इमं एआरिसं फलं ।**
**जाणमाणेवि जं धम्मं, कामभोगेसु मुच्छिओ ।।२९।।**
**।। युग्मम् ।।**

हस्तिनापुरे चित्र ! दृष्ट्वा नरपतिं महर्द्धिकम् ।
कामभोगेषु गृद्धेन, निदानमशुभं कृतम् ।।२८।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

तस्मात् ममाप्रतिक्रान्तस्य, इदं एतादृशं फलम् ।
जान्नपि यद्धर्मं, कामभोगेषु मूर्च्छितो ।।२९।।

।। युग्मम् ।।

**नागो जहा पंकजलावसण्णो, दट्ठुं थलं नाभिसमेइ तीरं ।**
**एवं वयं कामगुणेसु गिद्धा, न भिक्खूणो मग्गमणुव्वयामो ।।३०।।**

नागो यथा पङ्कजलावसन्नो, दृष्ट्वा स्थलं नाभिसमेति तीरम् ।
एवं वयं कामगुणेषु गृद्धा, न भिक्षोर्मार्गमनुव्रजामः ।।३०।।

**अच्चेइ कालो तरंति राईओ,**
**नयावि भोगा पुरिसाण निच्चा ।**
**उविच्च भोगा पुरिसं चयंति,**
**दुमं जहा खीणफलं व पक्खी ।।३१।।**

अत्येति कालस्त्वरन्ते रात्रयो, न चापि भोगा पुरषाणां नित्याः ।
उपेत्य भोगाः पुरुषं त्यजन्ति, द्रुमं यथा क्षीणफलं वा पक्षिणः ।।३१।।

**जइ तंसि भोगे चइउं असत्तो,**
**अज्जाइं कम्माइं करेहि रायं ।**
**धम्मट्ठिओ सव्वपयाणुकंपी,**
**तो होहिसि देवो इओ विउव्वी ।।३२।।**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

यदि त्वमसि भोगांस्त्यक्तुमशक्तः आर्याणि कर्माणि कुरू राजन् ।
धर्मे स्थितः सर्वप्रजानुकम्पी, ततः भविष्यसि देव इतो वैक्रियी ।।३२।।

**न तुज्झ भोगे चइऊण बुद्धी, गिद्धोसि आरंभपरिग्गहेसु ।**
**मोहं कओ इत्तिओ विप्पलावो, गच्छामि रायं आमंतिओसि ।।३३।।**

न तव भोगान् त्यक्तुं बुद्धिः गृद्धोऽसि आरम्भपरिग्रहेषु ।
मोघं कृत एतावान् विप्रलापो, गच्छामि राजन् ! आमंत्रितोऽसि ।।३३।।

**पंचालरायावि अ बंभदत्तो साहुस्स तस्स वयणं अकाउं ।**
**अणुत्तरे भुंजिय कामभोगे, अणुत्तरे सो नरए पविट्ठो ।।३४ ।।**

पाञ्चालराजोऽपि च ब्रह्मदत्तः, साधोस्तस्य वचनमकृत्वा ।
अनुत्तरान् भुक्त्वा कामभोगान्, अनुत्तरे स नरके प्रविष्टः ।।३४।।

**चित्तो वि कामेहिं विरत्तकामो, उदत्तचारित्ततवो महेसी ।**
**अमुत्तरं संजमं पालइत्ता अणुत्तरं सिद्धिगइं गय त्तिबेमि ।।३५।।**

चित्राऽपि कामेभ्यो विरक्तकामो,
उदात्तचारित्रतपा महर्षिः ।
अनुत्तरं संयमं पालयित्वा,
अनुत्तरां सिद्धिं गतिं गतः इति ब्रवीमि ।।३५।।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

## સંપાદિત સાહિત્ય

૧. મહોત્સવનું સંભારણું
૨. ચાલો જીવન શુદ્ધિ કરીએ...
૩. શ્રી ભદ્રંકર જિન-ગુણ સ્તવન મંજૂષા
૪. ભક્તિ કરતાં છૂટે મારા પ્રાણ
૫. સમાધિ સરિતામાં સ્નાન કરો
૬. આરાધો નવપદ, પામો પરમપદ
૭. પ્યારા મારા પારસનાથ
૮. ઘરઘરનું ઘરેણું
૯. શ્રીમેરૂવિજયગણિ રચિત ચતુર્વિંશતિજિનાન્દ-સ્તુતય: સ્વોપજ્ઞવિવરણયુતા:
૧૦. સર્વજિનસ્તુતયશ્ચ લઘુચૈત્યવંદનચતુર્વિંશતિકા
૧૧. શ્રી સમ્યક્ દેવતત્વ
૧૨. શ્રી સમ્યક્ ગુરુતત્વ
૧૩. શ્રી સમ્યક્ ધર્મતત્વ
૧૪. આચારોપદેશગ્રંથ
૧૫. નવસ્મરણાદિ **ભાગ-૧**
૧૬. શ્રમણ ક્રિયાના સૂત્રો **ભાગ-૨**
૧૭. દશવૈકાલિક-યતિશિક્ષા અધિકાર આદિ **ભાગ-૩**
૧૮. ૪ પ્રકરણ ૩ ભાષ્ય - ૬ કર્મગ્રંથ **ભાગ-૪**
૧૯. તત્વાર્થ-જ્ઞાનસાર-યોગસાર **ભાગ-૫**
૨૦. શાન્તસુધારસ-યોગશાસ્ત્ર **ભાગ-૬**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

૨૧. વીતરાગસ્તોત્ર-વૈરાગ્યશતક-ઇન્દ્રિયપરાજયશતક-સંબોધસત્તરી-
સિંદૂરપ્રકર **ભાગ-૭**

૨૨. બૃહત્ સંગ્રહણી-લઘુક્ષેત્રસમાસ-પ્રશમરતિ **ભાગ-૮**

૨૩. ૧૨૫-૧૫૦-૩૫૦ ગાથાના સ્તવનો **ભાગ-૯**

૨૪. સમકિતની-આઠ દૃષ્ટિની - અઢાર પાપસ્થાનકની સજ્ઝાયો નિશ્ચય વ્યવહાર ગર્ભિત સ્તવનો **ભાગ-૧૦**

૨૫. શ્રી ગચ્છાચાર પયન્ના (મૂળશ્લોક-સં.છાયા+શ્લોકાર્થ)

૨૬. પૌષધ કરીએ પાપ પરિહરીએ

૨૭. શ્રી આચારાંગસૂત્ર (મૂળશ્લોક + સં. છાયા) **ભાગ-૧**

૨૮. શ્રી આચારાંગસૂત્ર (મૂળશ્લોક + સં. છાયા) **ભાગ-૨**

૨૯. શ્રી આચારાંગસૂત્ર (મૂળશ્લોક + સં. છાયા) **ભાગ-૩**

૩૦. શ્રી આચારાંગસૂત્ર (મૂળશ્લોક + સં. છાયા) **ભાગ-૪**

૩૧. શ્રી સ્થૂલભદ્રચરિત્ર (પૂ. જયાનંદસૂ. મ. સા.)

૩૨. શ્રી ગચ્છાચાર પ્રકીર્ણકમ્ (શ્રી વાનરર્ષિ ટીકા)

૩૩. શ્રી ગચ્છાચાર પ્રકીર્ણકમ્ (શ્રી વિજયવિમલગણિ ટીકા)

૩૪. શ્રી કલ્પસૂત્ર

- જૈનત્વ સંસ્કાર જાગરણ નિયમાવલી (પાઠશાળા માટે)

## આગામી પ્રકાશનો

- શ્રી દશવૈકાલિકસૂત્ર (મૂળશ્લોક + સં. છાયા)
- શ્રી શીલદૂતમ્ કાવ્ય (ટીકા સાથે)
- બાંધી તુજ શું પ્રીત (ગુજ.)
- શ્રેયસ્કરી જિન સ્તુતિ ચતુર્વિંશી (તત્ત્વપ્રભ વિવરણોપેતા) (સં.)

Jain Education International For Personal & Private Use Only www.jainelibrary.org

Jain Education International For Personal & Private Use Only www.jainelibrary.org



૨૭

પ્રકાશક

પૂ.આ.શ્રી જિનપ્રભસૂરિ ગ્રંથમાળા

અમદાવાદ

Jain Education International For Personal & Private Use Only www.jainelibrary.org